मिति कृष्णाजिने प्रोहति सर्वेषु तंडुलेषु पिष्टीभूतेषु दीर्घामित्यनेन मंत्रेण तानि पिष्टानि कृ
ष्णाजिने प्रोहति उपलया मेरयित्वा प्राच्यां कृष्णाजिनस्योपरिपातयतीत्यर्थः दीर्घामनुप्र एम
सितिमायुषे धामिति प्रोहतीति श्रुतत्वात् कृष्णाजिने पिष्टानि प्रस्कंदयतीति शंख्यांतरा ३८

© Dharmartha Trust J&K. Digitized by eGangotri

तु। आपसंभवः असंभवयन्ती विषयाणि निकुरुतीति तिसंप्रेक्ष्येति दासीपिनष्टियन्नी वा अपि वाप
न्नमवहंतिस्त्रूद्धापिनष्टीति चक्षुषेत्वेतीसतेन तन्दुलाजिनेपतितानि पिष्टानि चक्षुषेत्वेत्यने
न मंत्रेणेक्षते चक्षुषा पश्यतिर्ईक्ष इति चाध्याहारः साकांक्षत्वात् यागसाधनभूत द्रव्यसंस्का
रोयं तत श्चापेषणाभावे चर्विंष्यां तंदुलानामीक्षणं भवत्येव वाजप्रसवीयं जुहोतीति चयन्ते वा
जपेयेच सर्वौषधानामपिपिष्यमाणेषु निर्वपस्सन्मो महीनामिसांजं पिष्यमाणेषु यो राम्नीध्रा
वायोयजमानएवमहीनामिसनेन मंत्रेणाज्यस्थाल्यामाज्यं निर्वपति पात्रान्तरादाज्यस्था
ल्यां प्रक्षिपतीत्यर्थः आज्यस्थालीलक्षणमुक्तं छंदोगपरिशिष्टे आज्यस्था प्रकर्त्तव्या तैजस
द्रव्यसंभवात् महीमयी वा कर्त्तव्या सर्वासामाज्याहुतिषु वा आज्यस्थाल्याः प्रमाणं तु यथाकामं
तु कारयेत् सुदृढां मत्रणं महासाज्यस्थालीमवेक्षत इति पिं: चंति पिष्टान्यभिघारते कपालान्य
थैक आज्यं निर्वपन्तीति स्मृतेः अत्र हरिस्वामिनः अध्वर्योराग्नीध्राद्वान्यः कः स चासंनिधेर्यमा
नोमंत्रान ध्याय नीदेक इति पुल्लिंगनिर्देशाच्च न पत्नी ब्रह्मा प्यपरिनोषणेपुपरिद्रव्यस्य पृथक्
रणेनीतिसमर्थः अतः स्वामित्वाद्यजमानएवाज्यनिर्वापं कर्तुमर्हतिमितिसरणवाम्यः एवंच
निरुप्याज्यं वद्दोसीति यजमानो वेदं करोतीति सूत्रे वेदकरणेन समानकर्त्तृकमाज्यनिर्वापा

© Dharmartha Trust J&K. Digitized by eGangotri

ण्गम्यमानममनुपपन्नंभवति अतोपद्यमानएवा ज्यनिर्वापस्तत्ता वेदं करोतीति तदुक्तंसूत्रकृता।
तानिरूप्याज्यं वेदोसीति यजमानोवेदं करोति कृत्वा मुष्टिः संस्कारार्थं तं वत्सज्ञानुं त्रिवृतं तत्
त्का यं वा पशुब्रह्मवर्चसवीर्यान्नाद्यकामा यथासंख्यमिति मनुः वेदं करोति वत्सज्ञुं मसस्यमावे
३९
39
द्यन्तूले दक्षिणेनोत्तरत्तूलेषु शुल्बं यन्तिनिधायत्रिरएनां वेद्यपसन्नस्य सुत्तरमुत्तरं संदक्षिणं प्रादेश्री
मात्रे शुल्वास्परिवासो करे मूलानि गमयति मूलानि निदधातां वेदं कृत्वा वेदिं करोतीति तैत्ति
रीये वेदं करोति वत्सजानुं पशुकामस्याभूतकार्यमन्नाद्यकामस्य त्रिवृतं तेजस्कामस्योद्वाग्नं
स्वर्गकामस्येति लौगाक्षिः वेदं करोतिदर्भमुष्टिं प्रसंख्यमावेष्ट्य यतु ज्याग्रापादं शुल्वं कृत्वा त्रिः
परिहृत्य शुल्गुणे शुल्वान्तमन्तकृष्णायम्य शुल्वान्तादेरेछित्वाग्राणी प्यनिधायो करे मूलानि ततो
वेदिकरणमिति आपस्तंबश्च दर्भाणां वेदं करोति वत्सजुं पशुकामस्यमूतकार्यमन्नाद्यका
मस्य त्रिवृत्तिरसं ब्रह्मवर्चसकामस्य शुल्वान्तादेपोपरिवास्यवेदं परियासनानिदधातीति व
त्सज्ञुर्वत्सतुल्यः मूतकं यौ मूतवत्क्रियते यत्र धान्यं निधीयते समूत इति त्रिवृद्देकशिरास्त्रि
वृच्छिरीः त्रीणिशिरांसीति केचित् कौमाभावेप्येताआकृतयः अकामः स्यात्रस्याविधा। राम
जाद्विनिनहीष्य वेदपरिवासनानि सर्वीरयेव वेदाग्राणीति च पीत्वांसपवित्रायांपिष्टान्याव ३९

पतिर्देवस्त्वेति ततः सपवित्रायां पात्र्यां पिष्टानि आवपति। अजिनमुत्थापनेनैव पात्र्यां प्र
क्षिपतीति हरिस्वामिनः। देवस्त्वेत्यनेन मंत्रेण पवित्रवति संवपति पात्र्यां पवित्रे अवधाय दे
वस्त्वेत्यादि श्रवणात्। पात्र्यामित्याकारविशेषवति महति पात्रे इत्यर्थः। आपस्तंबः प्रक्षाल्य
यितायां पात्र्यां निष्टप्तोपवातायां पवित्रवत्यां पिष्टानि संवपतीति तथा संवपन्वाचं यच्छन्निता
मभिवासयन्विसृजत इति पात्र्यामावपनं च समर्दनार्थं अतश्चरुतंदुलेषु न भवति सपवित्रता
नुवरणं वपि भवर्त्तते अदृष्टार्थत्वात् अथ पणस्य पश्चादुपविश्य संततवेदिवा संवपनानंतरं मपिष्टं
पात्रीमादायेत उद्धीय अपणस्य गार्हपत्यस्य पश्चादुपविशति अथवा पेषणदेशादुद्धीयां
तर्वेदि वेदिमध्ये उपविशति वेदेरंतः अंतर्वेदि वेधा च करिष्यमाणा पात्रदेशे लक्ष्यते यस्मि
न्देशे शास्त्रेण वेदिर्विहिता तस्य देशस्याभ्यंतरे उपविशति सपिष्टां पात्रीं गृहीत्वा तामेव तत्रासा
दयतीत्यर्थः। कुत एतत् स्मरतः पिष्टानां संपवनश्रुतेः निधाने च विहिते सौकार्ये दोवाएवेर्श्यं तंमा
षमेव नूच्यते अंतर्वेदीति पृथगुपादानात् क्रूपणशब्देनात्र गार्हपत्यसान्निधीयते अथवाभ्यपण
स्यापश्चादुपविशतीत्येना वा तेवपाक्षिके तर्वेफपवेशने सिद्धेनात्र गार्हपत्यसान्निधीयते अथ
वी अपणस्यापश्चादुपविशतीत्सेनावा तेवपाक्षिके तं तर्वेफपवेशने सिद्धेनात्र गार्हपत्यसान्निधी

© Dharmartha Trust J&K. Digitized by eGangotri

यते अथवा श्रपणस्थोपस्थादुपविशतीमेनावाप्तेव पाक्षिके तं वेदं कपवेशने सिद्धे नीत्रगार्हप
४० त्योतिचीयते अथवा श्रपणस्थात्समश्वादुपविशतीत्येनावानेव पाक्षिके तं वेदं कपवेशने सिद्धे
40 यदंतं वेदीसुचप्तेत हार्हपत्ये श्रपणपक्षेप्यंतं वेदंकपवेशनं विकल्पेन यथास्मादिति उपसा
र्जनीरन्यपत्यन्यः अध्वर्योरन्यस्मात् आग्नीध्रः उपसर्जनीरुद्रस्मानीय उपविश्य पात्रीस्थयिष्टान्या
मुपयानयति निनयतीत्यर्थः अथैक उपसर्जनीभिरेतिता आनयतीतिश्रुतेः अस्यार्थः एको
न्यः आग्नीध्रः उपसर्जनीतिः उपसृमार्ये संसृज्यन्ते संमिश्र्यन्ते हविराभिरित्युपसर्जन्यः आ
पः समावप ॐ षधीभिरिति मंत्रलिंगात् शाखांतरप्रयुक्ताभिः संहेति सहयुक्ते इति ननीमाग
हीत्वा आगच्छति गार्हपत्याद्दूरदेशंता आनयति पश्चात्तेपिष्टकः यस्य हस्ते वृत्ते स एवाग्नी
ध्रः पवित्राभ्यां प्रतिगृह्णाति समापइति अध्वर्युस्ता आग्नीध्रानीयमाना उपसर्जनीसंज्ञा अपः
समापइति मंत्रांते पवित्राभ्यां प्रतिगृह्णाति ताः पवित्रीभ्यां प्रतिगृह्णातीति श्रुतेः संयौति जन
यत्यैत्वेति ततोध्वर्युर्जनयत्यैत्वेति मंत्रेण संयौति सुमिश्रं लोपिष्टाल्हिः सम्यक् मिश्रयतीत्यर्थः
अत्राह आपस्तंबः प्रोक्षणीवत्पिष्टाक्षसूर्वप्रणीताभिः संयौत्यन्यावापजुषोम्फयपदि प्रणीता राम: ४०
नोधिगच्छेत्स्रुवेण प्रणीताभ्य आदाय वेदेनोपयम्य समापो अद्भिरग्मतेति पिष्टेष्वनीयाहुः परि

© Dharmartha Trust J&K. Digitized by eGangotri

मज्ञाता इति तस्माभिरनुपरि श्राव्य जनयस्मै स्वेति संयौतीति मनुरपि वेदोपयामः स्रुवे स्रुवेण
णोत्ता माहरति समाप्ते ॐ स्वधा रिस्यासिंचतितस्माम्प इति तथा पृथग्घमितितथाः परिसार
यति पिशृनिसंनयतीति च लौगाक्षिः प्रणीतास्तथाः पत्नवतीः समापद्दस्यासिंचेतीति तैत्तिरि
सूत्रेपि अथ परिकर्मिणमाह आहरणय इति आनयेदस्माह आहरतीत्येष कारः प्रणीताभ्यः
स्रुवेणोपहृत्य वेदेनापमम्पाणिनांनद्वैयेवं मदंतीभ्यस्ताउभयीः समानीयमानाः प्रतिमंत्र
यते समापद्दस्यादि पूर्वस्थाने नैवोक्तं तपंतिपिश्संपवनीया आपद्दतिचराव प्युपसर्जनानिन
यनं भवत्येव तत्राप्युदकार्थस्य विद्यमानत्वात्तसंयवनं तु न भवति कार्थलोपात् समं विभज्यास
ऽहरिष्यन्नालभत इदमग्नेरिदमग्नीषोमयोरिति संयवनानंतरं समं विभज्य द्वौ पिंडौ कृत्वा
असहरिष्यन्नु नर्मिश्रणमकरिष्यन् क्रमेणैतौ पिंडावालभते उदकसंस्थौ पात्र्यां निहितौ अ
वरोक्तमुत्तरं हविषी स्रुक्तौ इदमग्नेरिति दक्षिणमाग्नेयमालभत इदमग्नीषोमयोरित्युत्त
रमग्नीषोमीयं अथ द्वेधा करोतीति यद्दि द्वे हविषी भवतः पौर्णमास्यां वै द्वे हविषी भवतः स यत्सा
पुतर्नसंऽहरिष्यन्त्स तदभिमृशतीदमग्नेरिदमग्नीषोमयोरिति नानावाऽएनदग्रे हविर्गृह्णं
तितन्त्स्व वध्नंति तन्त्सहपिंऽषंतितत्पुनः नाकरोति तस्मादेवमभिमृशतीति अन्तच्चात्रय द्विद्वेइ

© Dharmartha Trust J&K. Digitized by eGangotri

तिकुर्वन्नमावास्याधिमन्कुते वेत्ति दर्शयन्ति पौर्णमास्यां वै द्वे नित्यं द्रव्यमभिश्रयः ऐन्द्रमग्न्याजिनत्व
४१ मावास्यायामपि द्वे भवत एव अत एवानयोर्हविषोर्ग्रहणं प्रोक्षणं चैवमथ कृत्वा तत एकत्र
संयोज्य संहैव कंडनपेषणसंयमानि कृत्वाधुना विभज्य यथास्वमालंभः कार्यः अतश्चद
र्शार्थोपमालंभः तेनैकस्मिन्हविधिन प्रवर्त्तते किंच विभागपूर्वोस्यालंभः नचैकस्मिन्विभा
गोस्ति ननु समं विभज्येत्स्य तावतासिद्धेः असंहरिष्यन्नेतत्किमर्थं उच्यते विषमेपि विभागेभ्यासा
न्कृतेप्यालंभानंतरं पुनरपि संहृत्य संविभागकरणवारणार्थमेतदिति पितृभूतिः अथ यदैवं यो
जना असंहरिष्यन्नित्यनेनालंभस्य कालांतरं विधीयते यस्मिन्काले असंहरिष्यन्भवति त
दैव विभज्यालंभनेनैनं कालांतरमनीक्षते तेन चरूणां फलीकरणं तत एव विभज्यालंभः पौष्णस्य पे
षणं तत एव विभज्यालंभः पुरोडाशानामनुसंप्रवनीते अत एव श्रूयते स यत्र पुनर्नैतं हरिष्या
त्स्यान्न द्वितिगृह्णातीति यत्र यस्मिन्काले सोऽर्धयुः पुनः संहरिष्यत्स्यामुत्तमीकरणं करिष्यन्न
भवेन्न तस्मिन्नेव काले विभज्याभिमृशतीति तेन चर्वादीनं विभज्यालंभे पुरोडाशस्य संप्रवनोत्त
रकालता नियमो न भवतीति तात्पर्यं एतच्च ग्रहणं पुरोडाशैः सह विभागे द्वयं चैतेनुपरस्परं ॥ एम
चरुषु चैवेतीक्षणं तत एवाऽऽक्षणस्य प्रकृतौ सह दृष्टत्वात् अत्रार्थविरोधाच्च यथादेवतमप्य ४१

© Dharmartha Trust J&K. Digitized by eGangotri

२ अनर्देशाद्वारिकं हविर्यथादेवतं यायात तस्य देवतास्तस्य पथ्यं तनामोच्चारणेनातिप्रशेत इ
द मिंद्रागम्भोरिसेवं इ षेत्ते साज्यमधिश्रयस्यम्सः अग्नेर्योरन्य आग्नीध्र इ खेत्वेसनेन मंत्रेणा
ज्यं गार्हपत्ये धिश्रयति सोस्या वाज्यमधिश्रयतीति श्रुतेः आहवनीयश्रापिणोपि गार्हपत्यस्य
वाज्यमधिश्रयति त्रिधि श्रयामीति चात्राध्याहारः साकांक्षत्वात् अपत्नीकस्याहवनीये तच्छ्रा
पिणः अपत्नीकस्य रजोदोषप्रसव भवा साद्दिना असंनिहितपत्नीकस्य तच्छ्रापिण इ स्याहवनी
यश्रपिण आहवनीये हविःश्रपणं कुर्वतो यजमानस्याहवनीये आज्यमधिश्रयति आहव
नीये श्रापिणोपि संनिहितापांपत्न्यां गार्हपत्यस्य एवयतरएवं श्रूयते यस्याहवनीये हवींषि श्रप्यं
तीति प्रकृतस्य पत्न्यां पत्नी न भवत्स्य गए वत स्याहवनीये विश्रयतीति यस्य पन्नी न स्यात्तनियमे
नाहवनीय श्राधीत स्याम प्रथमाधिश्रयणमस्याहवनीय एव कर्तव्यमिति हरिस्वामिनः शाखां
तरे वैवं श्रूयते यस्य वत्से हनि पत्न्स नाणं भुक्ति स्यात्ताम परुद्ध्य जेतेति अनालंतु की रजस्वता
के विद्द पत्नी कोमत्त पत्नीक इत्याहुः तद्विषयमध्येतत् तस्मार्थे काकिनएवाधानं श्रूयते आ
श्वे[illegible]सन वा ह्लपो तदाहुरपत्नीकोप्यग्निमाहरेन्नाहरेदिस्याहुर्ये दिनाहरेदनद्धापुरुषः स्यात्को
नद्धापुरुष इति न देवान्न पितृन्न मनुष्यान् यजतीति तस्मादपत्नीकोप्यग्निमाहरेन्त देषा यज्ञगा

© Dharmartha Trust J&K. Digitized by eGangotri

थातिगीयते यजेत सौत्रामण्यामपत्नीकोथ सोमपः मातापितृभ्यामनृणार्थाय यजेत कथं नाकुते
५२ रिति तस्मात्सौम्यं याजयेत्तस्मादपत्नीकस्याधाने ऽकुर्वंस्तपत्नीकोग्निहोत्रं जुहोति अर्द्धापत्नीस
संयजमानः आर्द्धासत्स्यं तदि स्फत्तमथिथुनं अर्द्धयासस्तेन च मिथुनेन स्वर्गं लोकं जयतीति न
थावपन्नां मृतायां त्रिकांडमंडन आह स्त्रीमात्रम विशेषेण दग्ध्वाग्न्येवैदिकाग्निभिः विवाल्याश्च
तेयद्वाधानमेवास्ति चेद्वृत्तः एकाकी वाद्यौताग्नी द्विवाहश्चेत्तस्मिन्प्रतिनिसेध्या श्रयणान्या
ग्निहोत्रकर्मास्यनेनरदिति तथापत्नीमरणेप्यग्नीनारक्षणमथक्तं तस्मान्नैयैकदेशेन स्वयमापू
र्वंमारिणी पत्नी ज्येष्ठा नराद्वापि यज्ञपात्रैश्च निर्हपितं कामाप नः मृतायामग्निभार्यायां वैदिकाग्नी
न्त्रहित्स्यजेन्न उपाविनापि तत्कर्म यावज्जीवं समापयेदिति घर्मोसीति पुरोडाशं युगपत्न्धर्मोसी
त्यनेन मंत्रेणाध्वर्युः पुरोडाशं कपालेष्वधिश्रयति आज्येन युगपत् आज्येन सह आज्याधि
श्रयणं पुरोडाशाधिश्रयणं च सहैव भवतीत्यर्थः अधिवृणक्ता वैष पुरोडाशमधिश्रयस्तमावा।
ज्यंतद्वा एतदुभयं सह क्रियत इति श्रुतेः एषोध्वर्युः पुरोडाशमधिवृणक्ति अधिश्रयति अ
मावाग्नीध्र आज्यमधिश्रयतीति अग्नावितिसमाख्यासंनिहिताध्वर्यवे येष्टयावि भ्रन्कृष्टतरम एम ५२
ग्नीध्रम दृसादूरस्थवचनेनेगाह अत्र पुरोडाशाधिश्रयणं वेदेन कपालेभ्योंगारान्सराकृत्सकर्त्तव्यं तथा

© Dharmartha Trust J&K. Digitized by eGangotri

जापस्तंवः इदमिहमिति चेदेन कपालेभ्यो गाएन योस्त्वचर्मासीत्यामेयं पुरोडाशमष्टासु कपा
लेष्वधिश्रयत्येवमुत्तरमुत्तरेष्वेवमनुपूर्व्येणैवैष तदुद्दिष्टक्रमीणि क्रियंते समानजातीयेन क
र्मणैकैकमपवर्जयति यानि विभवंति सन्ति तानि क्रियंते इति अत्र विरोधादन्यकर्तृकत्वं तेन
विरोधाभावे पश्चाद्वाज्येषोयं यस्मादौ वा द्यावीरेवाज्याधिश्रयणमिति कर्कः तत्कथमभ्युपप
द्यत इति स एव वेदस्थ तस्तैनैवाहनने वचनादग्नीधः कर्तृत्वमुक्तं स यत्रैष हविष्कृतमुद्वादयति त
दृषोदृषदुपले समाहंतीत्यनया श्रुत्या अत्रापिता दृश्यैव श्रुतिरस्ति अग्निधिष्ठणात्तेप वैषपुरोडा
शमधिश्रयत्सस्तावाज्यमिति अतोत्रापि वचनादग्नीधः कर्तृत्वं तेनीत्याषंत्तेप्यध्वर्यावहननवद
ग्नीध एवाज्याधिश्रयणमिति युक्तमुत्पश्यामः सह्यधिश्रयणविधानाद्विरोधादेवान्यस्मिन्नाक्षेपद
मग्नहणसूत्रन्तकरोति न द्वविरोधेप्युपसंहादाव न्य एवाज्याधिश्रयणे कर्त्तापथास्यादित्येवम
र्थमितिसंप्रदाय इत्येवंपक्षकीयावार्यैरुक्तं तदेवमाचार्याख्यानांतरं तु तन्क्तमयुक्तमिति उरु प्रथा
इति प्रथयति यावत्कपालमनक्ति पृथुं उरु प्रथा इत्यनेन मंत्रेणाधिश्रितं पुरोडाशं पिंडं यावत्कपाल २१
मातिपृथुं प्रथयति पृथुं करोति यावत्कपालमिति यावंति पत्सरिमाणपृथूनि कपालानि तावंति पृथुं
करोतीत्यर्थः कीदृशं अनक्ति पृथुं पृथुं अनक्ति पर्यतः पृथुरक्ति पृथुरक्ति विपुलः न अनक्ति पृथुरन

© Dharmartha Trust J&K. Digitized by eGangotri

× दित्युहैक आहूयाधं तमेव स्वयं मनसा सत्रा पृथुं मन्येतैवं कुर्या × २

तिपृथुः तमननि पृथुं नातिविपुलं लौकिकापूपसदृशमित्यर्थः तं प्रथयपतीति प्रकृतस्य तत्र स
४३ त्रा पृथुं कुर्यादश्वशफमात्रं कुर्यादिति श्रुतेः तं नसन्नेति सत्राशब्दः सत्यनामसु पठ्यते अद्धा
चच शब्दश्च सतु सहार्थे नोन्नेशनपथे प्रवृत्तस्य सत्यभेवत्वादित्यविरोध एवं तत्तश्च नस्य पृथुं कुर्यात्
43 याद्दृशं स्यपृथपार्थवं भवति ताद्दृशं कुर्यादित्यर्थः तेनार्थादेतदुक्तं भवति अति पृथुं न कुर्यादिति
अन्येषु त्वेवमर्थयन्यमानं दष्टूत्तिशब्दस्यैवार्थे सत्राशब्दवर्णयंति तेषां सत्रनाम श्रुतिविरुध्य
तेनाहेवसत्रा संति केनोदूर इति चाति शब्देन सह प्रयोगश्च पर्यायत्वादनुपपन्नः तस्मात्स्य पृव
चनौ सत्राह्वाशब्दो मानुष ममुष्य रात्तकमंडकं कुर्यादिति कस्तद्वेदेति अश्वशफो ह्यनियतपरि
माण एव महतो श्वस्य महान् अल्पस्याल्पः नियतपरिमाणं वध्यवन्यपरिच्छेदकं वायालमित्या
शिमायः यावंतमेव स्वयं मनसेति न युगशम्यादिवदश्वशफो मानाय्युपेतः मनसैव यावं।
तं मध्यमाश्वशफपरिमाणो देशेन नाति पृथुं मन्यैन्नत्परिमाणविशिष्टं कुर्यात् इति अत्राह
पलं वः उरु प्रथस्वेति पुरोडाशं प्रथयत्स्वर्वाणि कपालान्यति प्रथयस्तुं गमनभूयात्कृतिं कूर्म
स्येव प्रतिक्षनिमश्वशफमात्रं करोति यावंतं वा मन्येत तं न सत्रा पृथुं करोतीत्येके इति मनुरपि राम
इदमिति वोदनकपाले भ्योभस्मा योहति घर्मोसि विश्वायुरित्स विश्रयस्येव मुत्तरमेकैकं कर्मा ४३

× दैयतसोपिरयल्लोर्ई गव चच रा नपर्यां तमन्येत × ६

© Dharmartha Trust J&K. Digitized by eGangotri

भयोः दृंहेयों रुप्रथस्वेति यावत्कपालं कूर्मीकृत्य प्रथयतीति लोगास्सिरपि धि[...]ो कृत्वा घर्मैर
स्य विश्रिस्योरु प्रथस्वेति प्रथयति कूर्मेह पाविति सूत्रांतरेस्वसंमुसन्कत्वाति मश लगर्येत्वा
गीषोमाभ्यामनुष्मा अमुष्मा इति यथादेवतं पिंडं करोति कूर्मस्य स्माशिरइति तं दक्षिणेषां कपा
लानां प्रस्कद्मांगारास्तेष्वधिवृणक्ति यमीसि विश्वायुरिति प्रथयत्स्फरु प्रस स्वोरु ते यज्ञपतिः
प्रथतामिति तत्तंनर्त्तं कूर्मप्रकारं करोति कपालान्यति मापयतीति अत्र सर्वे सुसूत्रेषु पुरोडाश
योः क्रमेण [...] मणविधानान्न्हाधिश्रयणमनुपपन्नात्तेन एकस्मैव पुरोडाशस्याज्यस्य चस
हाधिश्रयणं द्वितीयादीनां तु क्रमेणैवाननुयावत्कपालं प्रथमिस्तु केतावत्परिमाण एव प्रथुर्भवि
ष्यति न न्यूनाधिकपरिमाणसूक्तिमर्थमुस्मन्नेऽननति प्रथुमिति सत्संउच्यते कपालपरिमाणे पू
र्वसिद्धे तेन पुरोडाशप्रथनपरिमाणज्ञापनमुपपद्यते न च वंनत्स्याक्वित्तदूं अनुक्तत्वात् अतः क
पालपरिमाणज्ञापनायैवैतद्ननति प्रथुग्रहणमिति तेन तावत्परिमाणान्येव कपालानि कुर्या
न् यावत्परिमाणेषु यावत्कपालेषु यावत्कपालं विस्तारितः पुरोडाशो लौकिकापूपवन्नातिप्र
थुर्भवतीति अतः षडंगुलहस्तज्ञातौ कपालविवितिर्यग्व्यासं प्रपद्येनेतथाकपालपरिमाणमाश्रयणी
यं अग्नेकयजमानके तु अस्य मंत्रस्योहो भवति उरु ते यज्ञपती प्रथेतामिति द्वियजमानके

© Dharmartha Trust J&K. Digitized by eGangotri

नु॰ अस्य मंत्रस्योहो भवति उरु ते यज्ञपतीः प्रथेतामिति द्वियजमानके उरु ते यज्ञपतयः प्र
५८ थंतामिति वहुयजमानके वरौच कार्याभावात् अयत्नीभावः अत्राधिश्रयणं प्रथनमहिरसि ति म
श्नैं चेनि तत्र धर्मे के कस्यक्रुचापरस्य कर्त्तव्यं वहुषु हविःषु अन्यथासु तत्तेषु कपालेष्वधिश्र
५५ यणास्मिंउः भुष्मेतत्तथासति प्रथनं न संभवति तेनार्थादेवं कर्तव्यं पुरोडाशं गंस्वधिश्रयणा
द्यपः तद्दंगं च क्रमः पदार्थानुसमयः पंत दाश्रयणेच पुरोडाशशेषप्रसंगः नवागानुरोधेन
प्रधानवाचो युक्तः यत्र तु नास्ति प्रधानवाचो दर्शपूर्णमासादौ द्वित्रिचतुरादिह विकेतत्र पदार्था
नुसमयेनैव कर्तव्यं अग्निष्टद्रुम्यहिरसि तिमृशति सकृत्त्रिर्वा अग्निष्टचवमिन्यनेन मंत्रेण तं प
युंक्त तं पुरोडाशं सकृदेकवारमभिमृशति सोदकेन हस्तेन सर्वतः स्पृशति प्रथनेत्रिप्रमाणेया
त्र यत्र विदीर्णो भवति तदद्भिः संदधाति संयोजयतीत्यर्थः त्रिर्वा वारत्रयं वाभिमृशति म सकृदे
वत मद्भि रसि मृशति सकृद्वा त्रिर्वा न पदेवास्यात्रावचनोदेस्सु कृत्वान् तदद्भिः संदधातीनि वा
क्यशेषात् अस्मिन्पक्षे सकृत्मंत्रेण द्विस्तूष्णीं एकद्रव्ये कर्मावृत्तौ सकृन्मंत्रवचनमिस्कृत्वा
न पिष्टलेपेनाविक्षारसंश्लिष्य परिमार्ष्टीति मानवे त्वचं गृह्णाषेसहिः श्लक्ष्णीकरोसनतिक्षारन्त्रि राम
त्यापस्तंबः एतच्च त्रौनस्मान् प्रयोजनाभावात् पर्यग्निकरोत्यंतरितं रक्षोनुरिता अप्रशस्य यद्विति ५५

© Dharmartha Trust J&K. Digitized by eGangotri

सहाज्यं सहाज्यमाज्यसहितं पुरोडाशं अन्तरितमित्यनेन मंत्रेणोल्मुकेन पर्यग्निकरोति तं पर्य
ग्निकरोतीत्यश्रुतेः तमित्येकवचनमविवक्षितं उद्देश्यगतत्वात् एवं सर्वेषु संस्कारवाक्येषु द्र
ष्टव्यमिति परिकार्थस्तु विवक्षित एव तेन सान्नाय्यस्य पर्यग्निकरणाभावः पिष्टलेपापनयनं पात्रां
गुलिप्रक्षालनं च पर्यग्निकरणात्प्रागेव कर्त्तव्यं सामर्थ्यात् अन्यथाग्निसंयोगात्कालविलंबाच्च
शोषणे सति प्रतिपत्तिकाले क्षालनमतिदुःकरं स्यादिति प्रतिपत्तिश्च चोदिता पात्रांगुलि
प्रक्षालनमात्स्येभ्यो निनयति पिष्टलेपीजुहोतीति उत्पत्तिश्च न चोदिता अतः सामर्थ्यादुत्पत्ति
रत्र सीयते अत्र काठके विशेषः यत्कृष्णमित्युल्मुकेन पुरः पत्नीः परिहृत्येति आपस्तंबः अंत
रितमिति सर्वाणि हवींषि त्रिः पर्यग्नि कुर्यादिति देवस्त्वेति श्रपणं पर्यग्निकरणानन्तरं देवस्त्व
इत्यनेन मंत्रेण पुरोडाशस्य श्रपणं करोति तं श्रपयति देवस्त्वेति श्रुतेः मनुः देवस्त्वेत्युल्मुकेना
भितापयति दर्भैः सह चेत्याहृ यतीति आपस्तंबः देवस्त्वेत्युल्मुकैः प्रति तपति दर्भैरतिज्वालय
ति ज्वालैर्वा विहरंतः श्रपयतेति वानं विसृजेत् तु आग्नीध्रो हवींषि सुशृतानि करोतीति लो
११ कीसेरपि देवस्त्वेत्यधिनाप्याग्निष्ट्वा इत्यादीत्येनत्वं चेन्नाहयतीति एतत्र श्रपणसामर्थ्यात्त्वरोर
चत्वात् उल्मुकमेरणेन कर्त्तव्यं धानानां च पुरोडाशस्यनूपरीति मानिरित्यालभते तौ पुरोडाशौ मा

© Dharmartha Trust J&K. Digitized by eGangotri

भोरेतस्मिन्नेनालभते प्रसेकं सोमिमृशति मा भेरिति ते अभिमर्शनं वश्यं तस्य तज्ज्ञानार्थं नमति
४५ मृशति श्चतं विदानीति वाक्यशेषात् अतश्च वीदावपि प्रवर्त्तते धानासु चमाभै ष्मा संविद्गय
मित्येव मूहः अधिश्रयणमंत्रे वधर्मीस्य विश्वायुश्चाति अतमेरुयिनि श्चता वभिवासयतिभ
45 स्मानावेदेनोपवेषेण वाश्चतो पुरोडाशावतूमेरुहरिस्मनेन मंत्रेण वेदेनोपवेषेण वा करणभू
ते न भस्मनाभिवासयति भस्मना आच्छादयतीत्यर्थः यदापतो याभिवासयतीति श्रुतेः त्रयस्क
नंयोः पुनर्ग्रहणमयदानार्थं श्चतग्रहणं श्चताविति द्विवचनं निर्देशः प्रदर्शनार्थः यथेह यदा श्चतो
याभिवासयतीत्येकचयुक्तमति वासनमुनयोरुक्तमेव मधिश्रयणं प्रथमश्च ऋस्मयर्यग्निकर
णाम्मये कच्चयुक्ता स्कभयोरपि पुरोडाशयोर्भवंतीति कुतः उद्देश्यगते कत्वसंख्याया अविव
क्षितत्वानदिति विरोधावुराववभिवासनस्याभावः यजमानयोर्यथा प्रजा यजमानो प्रजेति यथा।
यथमनकयहमानकेडु हः अत्राहापस्तंबः वेदेन पुरोडाशे मांगानं भस्माभ्यूहतीति सांगा
वेण भस्मनाभ्यछाद्येति कात्यके पात्रांगुलिप्रक्षालनमापोम्यातिनयन्नभिनयप्रसगसंसं
देमानंत्रितायत्वेतित यतिमंत्रत्रितायत्वेति यतिमंत्रं पात्रांगुलिप्रक्षालनमिति पिष्टलिप्ता एम ४५
पात्रीप्रक्षालनं पिष्टलिप्तांगुलिप्रक्षालनं चाभितर्मैत्रीस्थामे वज्वलतोल्मुकेनतापयित्वाम
नं पा

© Dharmartha Trust J&K. Digitized by eGangotri

स्वकं हस्य मसं स्पंदमानं परस्पा संगतिम श्रा मुवनं संमोदेवताभूतेभ्यो निनयति अध पात्रीनि
र्णे नजमंगुलिप्रर्णे जनं प्रास्येस्यो निनयति तघ द्दारे ये भ्यो निनयति तर्दक्षिणत पतितं थैषां
म तं भवति सं निनयति त्रिनाय स्वेत्या दिश्र्व एणान् तत्रानानि नयतीति वनीनाग थ्य क्व पर स्पर
म स्पर्शादि सर्पः आस्य ग्रहणं याग देवता ज्ञापनार्थं आस्येभ्य इति चतुर्थी आस्या नामत्र देव
नात्वावगमैतं ततश्चास्यानुद्दिश्य त्यागः कार्यः अतश्च लिखितरूद्रभयरूपमेतत्कर्म प्रति
पन्नरूपम सर्वोस्मादकं चते नद्रव्य विनापोपि स्विष्टकृद्देवद्रव्यांतरे णापि निनयनं कर्त्तव्यं
अपरे तु द्रव्यप्रधानत्वात्तद्विनाशे नोत्सर्गोनिमित्तं ति अत्राहापस्तंबः अंगुलिप्रक्षालनं पात्रीनि
सु र्णेजनं चोत्तरेके नाभितनयत्येतां तवेदिति स्तोलेखा विरवति प्राचीउदीचीवीतासंसंस्पंदयस्तिं
ल्लिनयति प्रसगपवर्ग मोकसा यस्वाहे स्मैतेः पतिमंत्र निनीपवाजितये दिति मनुपूर्वीद्वीवा
धाविस्तीपमात्रे प्रागुदीचीस्फ नतिस्त्रे ते द्विरिसूत्रे अथैतत्सात्रीसंक्षालनं गार्हपत्यादंगा
रेणाति तप्य हत्वां तवेदि प्रतीचीनं तिस्रषु लेखासु नयतीति आस्येभ्य इत्युच्यमाने माभूक्का।
स्यविदास्यंका यथा आस्या अपि देवतां ततं त्रितादपोपि देवतांतरं अथ पुनरास्तो लेखालि
खाति एकताय स्वाहा द्विताय स्वाहा त्रिताय स्वाहेत्येतैः संस्पंदयन्नेखासु पिंडलेपं नयतीतिभ्य

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रितायत्वति मंत्रं निनयतीत्स्फ्ये संसेवं नायतेयुः एते त्रिनाद्यस्तएवास्याः यज्ञास्यास्तएवत्रि
४६ तादयइति तथाचश्रूयते ततआस्याः संबभूवुस्त्रितोद्वितएकतइति अत्रतांविशेषणविशेष्य
भावेनोभयोस्सागप्रयोगः कार्यः इदं त्रितायास्या यइदं द्वितीयास्या यइदमेकतायास्यायेति
46 अन्वाहार्यंदक्षिणाग्नावधिश्रयति ततोध्वर्युरन्वाहार्यसंज्ञकं दक्षिणार्थंतंदुलरूपंदक्षिणाग्ना
वधिश्रयति अन्वाहार्यइति दक्षिणार्थस्यौदनस्यसंज्ञानघदेतद्धीनंयज्ञस्यान्वाहरति तस्मादन्वा
हार्यौनामेति श्रुतेः ततोदेवानांदर्शपूर्णमासयोर्दक्षिणामकल्पयन्नदन्वाहार्येनेददक्षिणा
ः हविरस्त्विति श्रुतेश्च अत्रार्थोस्तं वैविशेषदक्षिणामाचान्वाहार्यमहांतमपरिमितमोदनंपच
तिक्षीरेमेववतीस्येकइति काठकेच अन्वाहार्यमोदनं दक्षिणागोभ्येतंमहांतपरिमितमितिमानवे
ष्वेवमेवास्ति अतश्चतुर्णामृत्विजांतृप्तिर्यावतासंभाव्यते तत्परिमाणं ततोधिकंवान्वाहार्यमोद
नंकुर्यात् अत्रावाव्रतोपायनं अग्न्यावाप्तिकालेवाव्रतोपायनंव्रतग्रहणंकर्त्तव्यंशाखांतरात् अ
परेणाहवनीयंवेदिंखनति खनतिरत्रकरोत्यर्थे आहवनीयमत्रपरेणवेदिंकरोति अग्निपुरस्ता
त्समाधायेत्यक्त्वात् अपरेणाहवनीयमित्युक्तंखनतीतिप्रस्तुतंचाद्यह अंगुलस्यांतोअंगुलं। राम
अंगुलपरिमाणंखातमस्याः साअंगुलखाताता अंगुलखातांवेदिंकरोति अथवेदेपरिमाण ४६

© Dharmartha Trust J&K. Digitized by eGangotri

माहव्याममात्रीं पश्चात्पश्चादिति अपरस्यां दिशि तिर्यक्क्रमाणेन व्याममात्रीं व्याममप्रमाणां कुर्यात्
व्याममात्रीं पश्चात्सा दिसाहरिति श्रुतेः चतुर्भिररत्निभिर्यो भवति अरत्निं प्राचीं त्रयोरत्नयप्रमा
णमस्याः सा अरत्निः तां अरत्निं अरत्नित्रयप्रमाणां प्राचीं पूर्वापरायतां दीर्घां वेदिं कुर्यात् अरत्निः
प्राचीति श्रुतेः पुरस्तात्तिर्यक्क्रमप्रमाणमथ अरत्नित्रयात्मकमेव क्वचिद्दर्शनात्त्रयः पुरस्तादिति सोऽवे २
पश्चाद्गुरीयसी स्यान्मध्ये संह्वारिता पुनः पुरस्तादुर्वीति श्रुतेश्च अपरिमितां वा अथवा अप
रिमितां वेदिं कुर्यात् न परिमिता अपरिमिता तां तेन पूर्वोक्तप्रमाणान्यूनप्रमाणां वा अधिकप्रमाणां वा
कुर्यादित्यर्थः नात्र मात्रास्ति यावतीमेव स्वयं मनसा मन्येत तावतीं कुर्यादिति श्रुतेः अत्रैव घाः प
रिमाणं नास्त्येव यावतीयत्परिमाणविशिष्टामेव वेदिं स्वयं मनसा हविरासादनादिकार्यपर्याप्तां
मन्येत तत्परिमाणविशिष्टां वेदिं कुर्यादित्यर्थः व्याममात्री स्यादेरयमर्थः पश्चिमपार्श्वे तिर्यक्क्र
माणमेतत् द्रष्टव्यं व्याममात्रीति अरत्निः प्राचीदैर्घ्यमेतत् पूर्वपार्श्वे तिर्यक्प्रमाणं नोक्तं तद्देवसि
वहियोषां प्रशं संतीति वचनाद्व्याम एव मानी दूनरूतिकल्पोनीयं नात्र मात्रास्तीति पूर्वमान
प्रतिषेधो विकल्पार्थः ननु विनैव विधिप्रतिषेधाभ्यां अनियमो प्राप्तो नीत्यानियमकारिणो
विधिप्रतिषेधावनर्थकौ स्यातां नैष दोषः विधिना विना व्यामादिमानं नद्रक्षेराणमातव्येत्स्यथ मर्यान

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्ध्यति प्रतिषेधे नापि विना तद्विहितानसिद्ध्यतीति ततश्च योऽश्लिग्नहस्तग्रहणवद्व्यंजनामात्रेमीन
४७ इव्यस्य विकल्पोऽद्दष्टकः व्यामादिमानपक्षस्य च विहितत्वात्तंदंगीकरणे गुणविशेषफलविशे
47 षोऽदृष्टव्यः सा वै पश्चादिति वरीयसी उरुतरा संव्हारितान्वकोटिस्ये संकुटिता संकुचितेत्यर्थः
पुरस्तादुद्वी मध्यापेक्षया तस्यानंतरस्यापेक्षया प्रयुक्त्वात् वरीयसीत्सयमुरुत्वस्य पुष्पकर्षः
रुचैव पुरस्तादुद्वीत्येतत् ततश्च मध्यापेक्षया पुरस्तादुद्वीतनोपि पश्चाद्दुरुतरा किमर्थं पुन
रिदमुच्यतेति यमार्थं व्यामाद्यतिममेतीवद्दृक्तमप्यमेव व्यामादिनियमपक्षे पश्चात्सरिमाणमुक्तं
स्मात्तन्माक्वपरिमाणं च पक्षमध्यस्य संव्हारितत्वं तदपेक्षया वोरुच मेतदमा प्रमेव विधेयं पृथ्व्या
श्रोणयो ग्यस्याः सा पृथुश्रोणिः विमष्टान्तरे सेति श्रोणितो विमष्टं न्यूनमन्तरं न्यवकाशो यस्याः सो
विमष्टान्तरे तथाविधावंसौ यस्याः सीत योक्ता संग्नास्येति मध्यदिशे हस्तेन संग्रहीतुं शक्या नू
शोदरीति यावत् एवमेतां प्रशस्तयोषिदाकारां वेदिं कुर्वन्देवेभ्यः प्रियां करोतीति अस्मिन्सूत्र।
मंसे हूवेवा परिमितशाद्वेः श्रुतिवाक्यानुसरणात्परिमाणवाचिनो अपरिमितीवा अपरिमिते
ष्टको वेतिवत् अन्ये त्वपरिमितं प्रमाणं हूयत्न्यत् कचात्सूर्वोक्तपरिमाणवातिशयेनाधिकपरिमा राम
णवा वायकाइति अपरिमितपक्षेपि सा वै पश्चाद्वरीयसीत्यादि त्साघनुसारेलेखिकं प्रनंमवसेव ४७

© Dharmartha Trust J&K. Digitized by eGangotri

२१ सा प्राक्प्रवणा तां प्राक्प्राक्प्रवणां वेदीं कुर्यात् उदक्प्रवणा वेति सायंप्रा० २ कर्मणि सागेति अथौरं

अपरिच्छिन्ने देशे खननस्तरणादेः कर्त्तुमशक्यत्वात् प्राक्प्रवणामुदक्प्रवणां वा तस्मिन्नापोऽनेनेवा
ति प्रवणानीचं प्रवर्त्ततेवाचनमुदकमस्मिन्निति निदेवनिम्नं प्राक्प्राग्यां दिशि प्रवणं निम्नं नीचमस्या
केप्रवणेति च श्रुतेः मध्यसंगृहीतां मध्ये संगृहीतां संकुचितां मध्यसंगृहीतां तामेवंविधां मध्यप्र
देशे संकुचितां वेदिं कुर्यादित्यर्थः मध्येसङ्गृहीतेति श्रुतेः संगृहसाधनप्रकारश्च परिशिष्टे उक्तः
५ आनीयरज्जुं पूर्वार्द्धे सश्वार्द्धे यावद्देव तु द्विगुणीकृत्य तां रज्जुमंते तस्यास्तु शंकुशेषे आमयोन्नते नमाने
न तया रज्ज्वा षष्ठ्यांगयावाप्ट्युत्तुरीयेण भागेनालिख्य संगृहाविति कविहृदिश्रेर्त्पंतस्यो मध्ये ता
या रज्ज्वा षष्ठभागयेति पाठः अग्निममितो सौ अस्या वेदेः सो आग्नेये कोणे न कोणो अग्निमाहवनीय
मग्नित उभयतो भवतः अग्निं तो ग्निमङ्गसाउन्नयतीति श्रुतेः आहवनीयस्य दक्षिणोत्तरपार्श्वयो
र्वेधं सावुन्नयति उद्धृमाययतीति अंसयोर्मध्ये आहवनीयो भवतीत्यर्थः आतो सावपि वेदेरेवावय
वौ श्रोणिवत् अतश्च तयोरपि खननस्तरणादयो वेदिसंबद्धाः संस्काराः प्रवर्त्तन्ते सूत्रकारेण्यपोस
वर्हीष्यंसप्रदेशे मा शिन्नं दिदृधातीति श्रवत् अंसयोरपि वर्हिस्तरणं सिद्धं दर्शयति अत्रापंसाधनो
पायः षडरत्निरज्जुमित्यादि द्वितीयारत्नेन्ते लक्षणं श्रोण्यं कनार्थं ततोरत्नेश्च तुर्ये भागे लक्षणमीक
र्षणार्थं ततो यारत्नं ते प्राच्यं तां कनार्थं ततश्च तुर्थभागे ने अरत्नौ अंस आकर्षणार्थं ततश्च तुर्भागे

© Dharmartha Trust J&K. Digitized by eGangotri

नेऽंसांकनार्थं ततः साहूरज्जो पाश इति अयं च पाशन्वि पर्यासेन साधनोपायः विपर्यासपक्षे
४८ तुषडरत्निं रज्जुमुभयतः पाशीकृत्वा प्रथमं साहूरज्ज्वं तेऽंसांकनार्थं ततो द्वूरज्जो श्रोणपंकनार्थं
48 ततो रज्जेश्चतुर्थभागे आकर्षणार्थं अरत्निच्छेव मांतांकनार्थमिति अपरिमितपक्षाश्रयणे च
प्राचीप्रमाणपुरस्तात्तिर्यक्प्रमाणं त्रिगुणं चतुल्यं पश्चात्तिर्यक्प्रमाणं च प्राचीप्रमाणत्रतीयभा
गेनाधिकमिति युक्त्या कल्पनीयं तत्र च प्राचीप्रमाणं रज्जुं द्विगुणं कृत्वा रज्जो मूलात्पुरस्तात्तिर्य
क्प्रमीणस्यार्द्धे पश्चात्तिर्यक्प्रमाणस्यार्द्धे मूलरज्जोश्रांतिमच तुर्थभागस्यादौ आकर्षणार्थं लक्ष
णमिति अथ खननप्रमाणे पक्षांतरमाह आमूलोच्छेदनादोषधीनां प्राक्तवणामुद्वस्य स्मान्मू
ञात्सं दूकस्कृति न्यायेन वा शद्वोत्तानुवर्त्तते अध्याहिय ते वा अथवा आ ऊंषधीनां मूलोच्छेदना
द्वेदिं खनति अंगुलं वा अस्मिन्पक्षे विशेषमाह ऊंषधीनां मूलान्फच्छेत्त वै ब्रूयान् अब्बु युरस्तीधं
पस्योषधीनां मूलान्फछेत्त वा इतीमं प्रैषं ब्रूयान् स च प्रेषितर्युषधि मूलोच्छेदनपर्यंत निम्नां वेदिं
खनतितस्मात् अंगुली वेदिः स्यादिति अंगुलखननं विधाय तत्थानकुर्यादिति तं निषध्योषधीनेस
भूमूलान्फया लौच न तस्मादोषधीनामेव मूलान्फछेत्त वै ब्रूयादिति श्रुतेः मूलानि च भूमिमध्येभू राम
रमपिथीव न्यसरंति तावत्सर्यं तं वेदेः खननं कर्त्तव्यं अन्तस्मं गुलखात मूलोच्छेदनयोर्विक ४८

स्यः मैषश्च मूलोच्छेदनपर्यंतखननएव तन्नैवश्रूयते अन्तौषधिमूलोच्छेदमाहापस्तंबः
स्फ्येनोद्यामांसवमुद्धरति तया खनति द्व्यंगुलां चतुरंगुलां पापदात् नं सन्नीय तेना वरखनित
व्यंत्रो वेदिखननपरिमाणोपलक्षणार्थः तेन दार्शपूर्णमासाद्य व विद्यावति र याते मूलोच्छे औ
याभुल्वं तावती पृथमात्री रथवर्त्मनात्री प्रादेशमात्री वा पुरीषवती नेतामात्र अतिदक्षिण
तो वर्षीयसी प्राक्प्रवणं प्रागुदक्प्रवणं वेति अहार्यपुरीषां पशुकामस्य पशुकामस्य यजमा
नस्याहार्यपुरीषां वेदिं कुर्यात् आहार्यमन्यस्मात्प्रदेशादाहरणीयं पुरीषं यस्याः सा तथा तत
श्च भागतु माज्र्जनाद्वेदेः सकाशाद्वेदिपुरीषमपसार्यान्यत्पुरीषमानीय वेदिमध्ये प्रक्षेपणीयं
एतच्च पुरुषार्थं मण्यपनेकांस्यादिवत् अतश्च विकृतौ न भवति निःकामेनापि वेदिः पुरी
षवत्स्येव कार्या वेदिपुरीषं तत्रैव तिष्ठति न तत्तेति क्रियते वचनाभावात् तथा च श्रूयते पु
रीषवतीं कुर्वीतेति खाता वेदिर्नोहिः श्लक्ष्णीकरणीया किंतु पांसुले व कार्येत्यर्थः आपस्तंबः
पांसवो वेधं सा वृन्नयति मतीवीश्रोणी पुरस्ताद्ंहीयसी पश्चात्प्रथीयसी मध्ये सन्नतरा भवति
यन्मूलमतिशेते स्फ्येन तच्छिनत्ति न नखेय स्पुरीषमिति शेत उत्करे तं निर्वपति तं तृणपुरीषा
दिकमपसार्य वेदेरुत्तरतो वितृतीये परिसमूहनापसारितस्य तृणपुरीषादेरुत्करं राशिं करो

२४ न्याहार्यपुरीषां पांशुकामस्य कुर्यादिति वेदीं परिसमूह्य वितृतीये निरसनस्तु उत्करं करोति अन्वा
हार्याधिश्रयणानंतरं प्रथमां वेदीमानंके रौ ति मे च्चेर्यूप यथोक्तं ततोऽग्निवेदींपरिसमूह्य सह मे बेदीं
मध्यपर २४

© Dharmartha Trust J&K. Digitized by eGangotri

ति उत्कीर्यतरस्तु उत्करः वित्तीयं च वेदेः मन्कृत्वा त्तदीयमेण ईपस्माहवनीयांतराले वित्तीयं
४९ 49 च मुत्तूत्कृतोत्करंगार्हपत्याहवनीययोरंतरं योंसप्रधावागंतुसमंत्रे धाविमज्यायर वित्तीय
लक्षणेनदक्षिणाय म्यतस्मिन्नग्निर्विपर्यस्तोत्तरत उत्करं इत्येकः प्रकारः अग्निवांतरत्रिभागोनया
रज्वापूर्वोदेसमचतुरस्रं कृत्वा प्रोणामग्निर्विपर्यस्तोत्तराः सउत्करइतिविपर्यासश्चैवं पूर्ववित्ती
यलक्षणेनोत्तरत आयम्येति प्रथमेप्रकारेण ईपस्माहवनीययोरंतरत्रिभागोनप्रावरज्वापरर्द्दे
समंचतुरस्रं कृत्वा तस्यचतुरश्रस्योत्तराः सेउत्करइतिद्वितीयः प्रकारः आपस्तंवः वनदेवसवि
तरित्कत्तरपुरस्ताद्वितीयदेरुदग्ग्रीपादपरिसिनेवावेदेन्निर्वयतिसउत्करइतिलौगाक्षिः दूर्वोत्तर
तोनिर्वपतिसउत्करइतिमानवेउत्तरतोलेखानामाग्नीध्रः प्रक्रममात्रे उत्करे पाणिकोम्यन्हत्वो पविश
नीतिलेखास्थानं च तैनेवप्रागुक्तपूर्वीर्द्धेदिदेवित्तीयमात्रेप्रागुदीच्वीः स्फ्येनतिस्रोलेखालिखनीति
नी वित्तीयं च सामर्थ्यीहृदग्गारांतत्त्व पूर्ववित्तीयं परिशिष्टकारवचनान् आधायीभिप्रायाद्भवचात्ता
तोत्करएवं तरेण संचरइतिमन्निहितोहि चा लस्य जपतीदस्सवाहुरितितनोद्युर्देवस्वत्वा आदृदे
धरकृतमित्सनेनमंत्रेणसत्तणं सवमादापसव्येपाणौकृत्वा दक्षिणेनपाणिना नमेवसव्यहस्ते राम
स्थितं सत्तणं स्फमालक्ष्यत्स्त्वाइं दस्सवाहुरित्समुमंत्रंजपतिसहितास्वरेण सत्तणामित्कत्वा ४९

त्रणस्य सहत्वमात्रं आदानं तु स्फ्यस्यैव प्रयोजनं तृणादानविस्मरणे तूष्णीमेव + चालस्तोकरः पूर्व
वित्तत्तोत्थमवनीति कर्क्ः देवस्य त्वेति स्फ्यमाधायसतृण ऽ सव्ये कृत्वा दक्षिणेन + तृणादानं सम
स्फ्यमादत्ते देवस्य त्वेति तं ऽ स व्ये पाणौ कृत्वा दक्षिणेनाभिमृश्य जपति सं ऽ श्यतीति । अत्र तत्वा
त्तं संश्यतीति श्लो तनूकरणे तीक्ष्णीकरणे तीक्ष्णार्थः जपप्रयोजनं तनूकरणसंस्कारतदर्थं दक्षिणा
भिमर्शश्च ततश्च तदर्थमनुकारः कर्त्तव्यः सं ऽ श्यतीति प्रत्यक्षनिर्देशादिति हरिस्वामिनः । प्रित्य
श्चेत्य आददे ऽध्वरकृतं देवेभ्य इत्यस्फ्यहस्य तितः प्राक्षेपि दक्षिणग्रहणे सव्यहस्तस्यैवालंभन
विधानार्थमन्यथा भूमौ निधाय यथाप्यालंभः प्राप्नोतीति तदेतद्ज्ञापनार्थं संवपयुजुहरणार्थं अत एव त
दभावे भावः । नोपस्पृशेत्पृथिव्यामात्मानौ तेन संवपजुहरिमन् संवपजुहरिष्यन् संवपजुहरण
माकर्तेनाभिमृषेण वज्रेण पृथिव्यामात्मानौ पृथिवीमात्मानं नोपस्पृशेत्तेन संस्पृशेन नात्मानमु
पस्पृशति न पृथिवीमिति श्रुतेः वेद्यंतरणं निदधात्फदकु पृथिव्यै वर्मासीति तदानंतरं वेद्यां वेदि
मध्ये उदगुदगग्रं निदधाति पृथिव्यै वर्मासीत्यनेन मंत्रेण उदगिति नियमः । श्रोतः पाक्षिक प्राक्
त्वानिवृत्त्यर्थः ततश्च उदस्त्वाप चारेश्रो तंमुवइति मापश्चित्तं भवति पृथिवीं स्वपजतीति तृणे
तर्हिते महरति पृथिवीदेवयजनी रक्षनेन मंत्रेण ध्यर्मुतृणे तर्हिते नूप्रदेशेन रणास्मापसादुद्धमोस्फ्य

© Dharmartha Trust J&K. Digitized by eGangotri

नप्रहरति अपमन्त्रणमंत्रहीनमप्रहरति सप्रहरति पृथिवीत्यादिकृतेः न्त्रणमंत्रहीनमतस्यापरिग्र
५० हर्त्तव्यमिति निमाचवाचामीः पित्तमूत्सा चामी ऋषि अंतर्हितत्रणे प्रहरतीसेव मेव व्याख्यातवंतः
कर्कोचार्यास्तु प्रहरणं च वेघानतृणे अंतर्हितेइति सूत्रितत्वात् इतरथा हित्तणे प्रहरतीसे
वमवक्ष्यत् अथ पुनरंतर्हितवचनात्तादर्थ्यमेव तृणस्य न प्रहरणाधिकरणता एणएव प्रह
रणामिति संप्रदायः इति अत्राहापस्तंबः पुरस्तात्स्तंबमजुषो वेदेन वेदिंत्रिः संमार्ष्टि परिष्ठा
द्वा पूर्वार्द्धाहू देविंस तीयादि शाक्तंबयजुर्हरति पृथिव्यै वर्मासीति तत्रोद्गगंमागस्तं वा दर्भे नि
धाय पृथिवदेवयजनीनि स्फ्येन प्रहस्या पहतोररुः पृथिव्या इति स्फ्येन सत्तृणान्यां सूनपा।
दाय व्रजं गच्छेति हरतीति एवमेव सर्वेषु शाखांतरसूत्रेषु पित्तयज्ञे पृथिवि देवयजनीसू
ह्रंग्र मम धानार्थंस्वा हूदेः पृथिवीशब्दोत्र वेदिवाचकः तत्संस्कारार्थमंत्रेः व्रजं गच्छेति पुनीष
मादत्तो यत्र स्फ्येन प्रहारं कृतः तस्माद्देदिस्थानात्स्फ्येनोत्खात पुरीषमुद्वा ताभ्यां सूनादत्ते
हस्तेन गृह्णाति व्रजं गच्छेति मंत्रेण वर्षतु ते इति वेदिप्रेक्षते वर्षतु ते इत्यनेन मंत्रेणाध्वर्युर्वेदि
प्रेक्षते यतः स्थानात्पुरीषं गृह्णाति तन्मेवदेवदेप्रदेशं विलोकयति वधाने स्फकरे करोति तदेव ह एमः
स्तगृहीतं पुरीषं वधाने सनेनमंत्रेण त्करे करोति उत्करस्योपरि प्रक्षिपति प्रहरणशेषो नाविशे ५०

50

© Dharmartha Trust J&K. Digitized by eGangotri

षोपदेशात् प्रहियते नेनमंत्रेणेति प्रहरणमंत्रः प्रहरणशब्देनात्राभिधीयते व्रजं गच्छेत्सा।
दिमामौणिसंतोमंत्रः प्रहरणमंत्रस्य पृथिवि देवयजनीस्यस्यैव शेषो वा भवति कुतः अविशे
षोपदेशात् सविशेषेण प्रहरणे एवोपदिश्यते यतः प्रहरति पृथिवीत्यादिना अथवा एवं देवय
जना अविशेषोपदेशात् व्रजं गच्छेत्स नेन पुरीषमादत्ते वर्षंतु तइत्यनेन वेदिं प्रोक्षते वधानेत्य
नेनयां सूनुकरे करोती त्येवं विधो विशेषोपदेशो विशेषविधानं यत्तत्पथे नास्ति केवलं प्रहर
ति पृथिवीत्येवमेव सर्वोपि प्रहरणमुपक्रमपठितोस्ति अत एवं ज्ञायते प्रहरणमंत्रस्यैवायं
शेष इति अपरे त्वेवमाहुः यद्यपि यत्तत्पथे विशेषोपदेशो नास्ति तथापि शाखांतरे विशेषोपदे
शो अविशेषस्य चाविशेषपरतो व्याख्यातस्मात् हेदेनैवाव्ययवशः पुरीषादानादेः पृथक्को विनि
योगः अपारुरुमिति द्वितीयं प्रहरणादि अपारुरुमित्यादिभिर्मंत्रैः प्रहरणादि प्रहरणादारस्य
पुरीषस्योत्कर करणांतं द्वितीयं कर्म भवति अत्राहिग्रहणात् पुरीषादानादीन्यदार्थां त्वस्य मंत्र का
दर्शयति अन्यथा अपारुरुमिति द्वितीयं प्रहरणे एवमवक्ष्यत् अथ द्वितीयं व्रजस्यापारुरुमिति
मंतत्वात् अपारुरुमस्य रण्य आसुर इति कात्यायन वचनात् दासुरेषं मंत्रः तथा च श्रूयते अररु
हैवे नामासुररक्षसमासेति ततः प्रोक्षारणानंतरमप उपस्पृशेत् पित्र्यज्ञेन च देवपितृयजना

© Dharmartha Trust J&K. Digitized by eGangotri

दिस्येव पूर्हः अभिमस्यस्य अग्नीदुत्करमररो दिवमिति ततोऽग्नीदररो दिवमिति मंत्रेणोत्करमति
५१ 51 न्यस्यति अतिनिदधाति पाणिस्थामुत्करस्यपिधानं करोति उत्कराभिमुखो हस्तौ निदधातीत्य
र्थः तमग्नीदभिनिदधात्यररो दिवमिति श्रुतेः अभिनिधानं च द्वाभ्यामेव हस्ताभ्यां भवति नैके
नयत्नः प्रस्तरस्तरणानन्तरं मभिनिदधाति विविदधायाहृतिनिहितएवस्यैव नपाणिनाभव
स्य दक्षिणे न तु हस्मतिगृह्णातीति अत्रैवकारेण सव्यहस्तं प्रस्तरे पूर्वोक्तिनिहितमेव दर्शय
ति इहापि वतमर्गदितिनिधानमेव श्रुतं ततो द्वाभ्यां हस्ताभ्यामुत्करस्यावबाधनं नीचैरुक्रम
णां कर्त्तव्यं तथा चापस्तंबः अररुस्ते दिवं मास्कीन्निति स्कन्नमाग्नीध्रो जलिनाभिगृह्यास्यैवंहित्ती
यं तृतीयं च हरति चतुर्थं हरं त्र्युत्स्ववं दृत्तशेषं हरतीति इदमथासुरं यजु अपाररुम अरणे आसुर
इत्यस्माश्वान् अतउद्देको परर्थं नं भवति इत्यस्तस्मादिति तृतीयं प्रहरणादीत्यनुवर्त्तते इदस्य
स्तपामि स्मादिभिर्मन्त्रैः तृतीयं प्रहरणादि उत्करे निर्वपनांतं कर्म भवति अथ तृतीयप्रहरणे
इत्यस्मादिति श्रुतत्वात् तूष्णीं चतुर्थे सतृणं चतुर्थे द्रव्यकरणां तं कर्म तूष्णीं भवति इयं तु विशे
षः सतृणं उदग्रहितेन तृणेन सहितं पुरोषं उत्करे करोति तूष्णीं चतुर्थमिति श्रुतेः सर्वेपरि राम ५१
ग्रहं परिगृह्णाति दक्षिणतः पश्चादुत्तरतश्चास्फ्येन गायत्रेणेति प्रति मंत्रं ततोऽध्वर्युर्वेदस्तृ

© Dharmartha Trust J&K. Digitized by eGangotri

वेः परिग्रहं परिग्रहीष्यामीति एवं ब्रह्माणं मां मंत्रेण परिगृहाणेति तेनानुज्ञातः स्फ्येन करणभूते
न क्रमेण दक्षिणतः पश्चादुत्तरतश्च वेदिं परिगृह्णाति परिसमंतात् स्फ्येन रेखाकरणं द्विग्रहणी
वेदिरिति ज्ञापनार्थं परिगृह्णाति तथा च लौगाक्षिः स्फ्येन वेदिं परिगृह्णाति यावतीं करिष्यन्नि
ति पूर्वं परिग्रहमिमस्य कर्मणः संज्ञा संव्यवहारार्थाः पूर्वेण परिग्रहेण परिगृह्णीयात्सा होत्रेण गाय
त्रेण त्वा छंदसेति प्रतिमंत्रं एकैकेन मंत्रेणैकैकस्मिन्पार्श्वे परिगृह्णामीत्यर्थः तेन गायत्रेणे
ति दक्षिणतो दक्षिणपार्श्वे नैर्ऋतकोणादारभ्य पुरस्ताद्वेदिमध्यं यावत् स्फ्येन रेखां करोति तम्
स्त्रैष्टुभेनेति नो पश्चादपरपार्श्वे दक्षिणश्रोणेरारभ्योत्तरश्रोणिपर्यंतं ततो जागतेन स्फ्येनोत्तरश्रोणे
रारभ्योत्तरत उत्तरपार्श्वे वेदिं परिगृह्णाति पुरस्ताद्वेदिमध्यं यावत् सर्वैस्त्रिः पूर्वं परिग्रहं परिगृ
2 ह्णाति तथा गायत्रेण त्वा छंदसा परिगृह्णामीति दक्षिणत इत्यादिश्रवणान् छंदोभिरस्ति ततः परि रि
गृह्णातीति अभितः समंतात् तथा पित्र्येषु दिक्ष्विति द्रष्टव्यं अग्निं पुरस्तात् समाधायेति वचनादि
ति हरिस्वामिनः तेनासपर्यंतं वा परिग्रहणं कार्यं वेदस्याग्रांत्रिरुन्निरव्याहहरत्रिरिति वेषां वेदि
मध्ये त्रिरुल्लिखस्फ्येन निस्रो लेखाः प्राचीरुदक्संस्था उदीचीर्वा प्राक्संस्थाः कृत्वा अग्नीध्रं प्रस
ह्वर्युरेह ब्रवीति हरत्रिरिस्य वं ह वाग्नी लेखाः तमः शति आग्नीद्रेवं प्रेषितः सन् ताभ्यो लेखाभ्यः

© Dharmartha Trust J&K. Digitized by eGangotri

पांसूंस्त्रिर्हृत्वा उत्करे प्रक्षिप्यानन्तरं लेखां संमृशति संमर्शनेन समीकरोतीति पितृयज्ञाग्नि
५२ विस्पयोः एतदुक्तं लेखाकरणं हरति त्रिरिति मेषाग्नीधस्त्रिर्हरणं संमर्शनं च पितृयज्ञाग्निविस
योरेव भवति तन्नैवं श्रुतत्वान्न दर्शपूर्णमासयोः कुतः श्रुतत्वादिति तथा हि पितृयज्ञे ताव
त् सतत एव प्राक्तनं बर्हियजुर्हरतीति प्रकृतस्य पूर्वेण परिग्रहेण परिगृह्य लिखति हरति यद्धी
र्यं भवतीति श्रूयते अग्निचित्साम्यमपि अथ प्रापणीय निर्वपति तस्य हविष्कृता वाचं विसृजते
वाचं विसृज्य स्तंवयजुर्हरति स्तंवयजुर्हृत्वा पूर्वेण परिग्रहेण परिगृह्य लिखित्वा द्हरत्रिरिति
हरति त्रिरग्नीध्र इति अतो नैवं श्रूयते तन्नैवमवतीति माधूक्तं पितृयज्ञाग्निविस्पयोरिति ग्नि
विस्पयोरेव न संस्काराधिक्यं न तत् श्रूयते पोरेव वेद किं तर्हि अत्रानसंस्काराधिक्यं वचनादिति प्रा
प्ते आह वा तत्र दर्शनात् अत्र वाशब्दपूर्वपक्षनिरासार्थः न पितृयज्ञो दर्शपौर्णमासयोर्भव
ति कुतः तत्र दर्शनात् तयोरेव तत्र पितृयज्ञाग्निविस्पयोर्हि अन्यविधिपरवाक्ये लेखाकरणा
दीनि दृश्यन्ते यतस्तत्र प्रकृतितः प्राप्तानां दर्शनमेव न तु विधानं कुतः वाक्यस्यान्यपरत्वात् कथ
मन्यपरता पितृयज्ञे तीवन्सयज्ञोपवीती भूत्वा ज्यातिगृह्णानीति प्राजन्मदक्षिणायज्ञोपवीती त्ववि राम
धानपरं त्ववचनं यतः कर्मणः पित्र्यत्वेन प्राचीविधीयते अन्यस्तां वयजुर्हरणादि सर्वं प्राप्त मे ५२
ग्निविस्पयोरेव न संस्काराधिक्यं किं तर्हि अत्र ~~दर्शपूर्णमासयोर्भवति कुतः दर्शनात्~~ तयोरेव

© Dharmartha Trust J&K. Digitized by eGangotri

वानूयते अग्निविसायामहावेदेः स्फ्यादिस्पर्शनांतस्य कर्मणावसरमिचमेव प्राप्नोति तत्र वेधना
यज्ञोपवीतविधानार्थवचनं तत्र हि सोमिकावेदेरोपवसथ्याः सूर्वेहस्फ्यादानादि कर्मप्रकृतितः
प्राप्नोति प्रायणीयहविष्कृदंतेच वचनेनविधीयते अतस्तत्र प्रकृतितः प्राप्तानां दर्शनमेव नापवी
विधानं अनोर्दर्शपूर्णमासयोरपि लेखाकरणाहरणे प्रहरणं संमर्शनमपि भवंतीति सिद्धं वरुणप्र
घासेषु हरत्रिस्त्रिरिसेवं प्रेषादेयः आयसंवस्फनीत्रमांत्वचमुद्धंतिसमुद्धत स्याग्नीध्रउत्करेत्रिस्त्रि
वपतीति मानवेखननिह्यंगुतंच तुरं चोद्धृताद्याग्नीध्रस्त्रिर्हरतीति तेनिरिसूत्रेपि अथप्राचीस्फेन
वेदिमुद्धंतिः अथयाग्निमाहाग्नीदितस्त्रिर्हरेति तस्त्रिराग्नीध्रोहरति यद्याग्नीध्रस्त्रिर्हरस्तनं प्रेषमा
ह ब्रह्मन्नुत्तरमित्यादि वेदिकरणं यथोक्तमत्रेत्यनुवर्त्ततेयथोक्तं यथापूर्वमुक्तं वेदिकरणं तद्त्रा
स्मिन्नवसारलेखासंमर्शनानंतरं भवति किंच पूर्वमुक्तम्त्रंगुलखातां खनति ओषधीनां मूलोच्छे
दनपर्यंतं वाखनतीति तदस्मिन्नवसारकर्त्तव्यमित्यर्थः उत्तरं परिग्रहं परिगृह्णातिसुब्रह्मण्योनाज
खतीति प्रति प्रतिमंत्रं पूर्ववत् अत्रापि ब्रह्मन्नुत्तरं परिग्रहं परिग्रहीष्यामीति ब्रह्माणमामंत्र्यनुपरि
गृह्णाणेत्येवं तेनानुज्ञातोध्वर्युः पूर्ववदेवेदिं परिगृह्णातिस्तुब्रह्मचासीत्यादितिमंत्रैः प्रतिमंत्रंतम
नुविधोत्तरेणपरिग्राहेणपर्यगृह्णन्सूक्ष्माचासीत्यादिश्रुते उत्तरं परिग्रहमित्यस्य कर्मणः संज्ञा

© Dharmartha Trust J&K. Digitized by eGangotri

उत्तरपरिग्रहादि करोतीत्याह। स व्यवहारार्थः पूर्ववदिति स्फ्येन दक्षिणतः पश्चादुत्तरतश्चेति
५३ प्रतिमन्त्रमित्येतावतापि सिद्धे यत्त्रयाणां मन्त्राणां प्रतीकोपादानं तत्सर्वादिना पूर्वेण न्याये॥
53 न मन्त्रान्तराणां नार्थ इत्यर्थः हि स्तु इमा वाक्शिशिवा चेत्यत्रापि वाक्यसमाप्तिसंभाव्ये तान्त्रया
णां प्राक्प्रतीकोपादाने च कृते एष संदेहो न भवति पुरः क्रूरस्य स्वनुमार्ष्टि पुराक्रूरस्य सनेन मंत्रे
ण स्फ्येन वेदिमनुमार्ष्टि समीकरोतीति तां प्रतिमार्ष्टीति श्रुतेः प्रतिः पूर्वक्रियाविपर्यावर्त्तते पूर्वं य
खनता विषमा कृता अयुमाना समीकुरोतीत्यर्थः अन्नाहमनुः पुराक्रूरस्येति स्फ्येन वेदिं प्रती
चीमनुमार्ष्टि इति आपस्तंबश्च प्रतीचीं वेदिं स्फ्येन योयुष्म इति तैत्तिरिसूत्रे च अथ प्रतीचीं वे
दिं स्फ्येन योयुष्मत इति तेन पुरस्तादारभ्य पश्चात्संस्थमनुमार्जनं कार्यं खश्रुतौ सूत्रे च विशे
षानुपदेशात् पशुकामस्यानुमार्जनान्मा वदेः पुरीषं निः क्षिप्य करे प्रक्षिप्य तस्मादेशात्पु
रीषमानीय वेदिः पूरणीया ततोऽनुमार्जनेन समीकरणमिति अध्यधिवेदिं प्रोक्षणीर्धारयन् प्रो
क्षन्तः अध्वर्यो रत्न आग्नीध्रोऽध्यधिवेदि वेदेरुपरि शाखासमीपे वा नीत्वैः प्रोक्षणीर्धारयति पूर्वं स्रुक
म संचरे प्रोक्षणीर्निधायेति नारायणवृत्ती तत उत्साद्य वेदेरुपरि शाखा धारयन् अथ स्फ्यमुद्यम्याह एम ५३
प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुचः संमृड्ढि पत्नीं संनह्याज्येनोदेहीति यदीच्छेत् अध्वर्यु

© Dharmartha Trust J&K. Digitized by eGangotri

यदि प्रैषवचनमिच्छेत्तदा प्रोक्षणीषु वेदिमग्नीधा धार्यमाणासु चेदं सकाशात्स्फ्यमुपगृह्य
स्तेनोर्ध्वमुत्साद्याग्नीध्रं प्रति प्रोक्षणीरासादयेत्यादिश्याज्येनोदेहीत्येतं प्रैषमाद ब्रवीति यदि
प्रैषं दातुं नेच्छेत्पण वैषम यदि कामयेत ब्रूयादेतत्पथ कामयेत नापि नाद्रियेत स्वयमुत्स्येवैतद्वेदे
दमतः कर्म कर्त्तव्यमिति श्रुतेः प्रैषपक्षे तदभावत्ततो न ब्रूयात्तदा स्वयमेवाग्नीध्रो प्रेषितोपि स्मा
हननाद्विवस्तोत्तलीरासादयेद्योयं बर्हिरुपसादयेत्सादिता यासं श्रेषपक्षेन प्रोक्षण्यासादनादीना
मग्नीध एव कर्तृत्वं इति हरिस्वामिनः स्वयमेवाग्नीन् श्रुति विहितं वेदेदमतः परं कर्त्तव्यमिति
अतो प्रेषितोपि कुर्यादिति अन्ये त्वप्रैषपक्षे यदार्थीनाममध्वर्युकर्तृत्वमाहुः स्वयमेवाध्वर्युर्वेदेद
मतः कर्त्तव्यमिति कात्यायनानन्तपत्नीशब्दस्माने कृपत्नीकेष्यनूहः एकवचनान्तस्यैव समाम्ना।
नात्तन प्रकृतावपूर्वत्वादिति न्यायात् अयशब्दो धार्यमाणास्वेव प्रोक्षणीषु सर्वप्रैषाणां प्रापण
र्थः अन्यथा प्रैषसमनन्तरमेव प्रैषार्थानुष्ठानस्य सर्वत्र न्याय्यत्वात्प्रोक्षणीरासादयेतिश्रवणानं
तरमेव प्रोक्षण्यासादनं प्राप्नोतित्तन्माभूदृत्सर्वप्रैषानन्तरमासादनं यथा स्यादित्येवमर्थो यशब्द
अत्रेध्मा बर्हिः शब्दो वरुणप्रघासेषु विपरिणम्यते आज्य शब्दश्च प्रोक्षणीशब्दस्तु नोत्थ्यते बहु
वचनान्तत्वात् तत्र श्वैवं प्रोक्षणीरासादयेध्मा बर्हिषी उपसीदयस्रुवः संमृड्ढि पत्नीं सं नह्या

© Dharmartha Trust J&K. Digitized by eGangotri

ननु त्वं नायं प्रैषः किं तर्हि प्राप्तकाले लोट् व्यत्ययेनोत्तमस्थाने तेनाविरोधो न भविष्यतीति मत्वोत्तरं नायं प्राप्तकाले लोट् किं

ज्यास्ता मुदेहीति गृह्णमेवा यो यां स्रुचम् एकत्वस्तु सत्वं संमृड्ढीत्यूहः उपसदिन्तु न्यग्द्वये स्रुवौ संमृ
५४ ड्ढीति अनेकयजमानके बर्हीषूहः व सानुयासु इध्मान्बर्हीष्युपसादय अग्ने रुद्र हीत्यूहः अत्रे
54 दं संदिह्यते किं यएव प्रैषे स एव प्रैषार्थे उतान्यः प्रैषे अन्यः प्रैषार्थ इति किं तावत्प्राप्तं एक एव प्रे
षप्रैषार्थयोरिति कुतः समाख्यानात् अन्यदन्यस्कन्तवाच्य न नुखात्मनि प्रैषा विप्रतिषिध्यते न
हि कश्चिदात्मानं प्रेषयति नायं प्रैषः किं तर्हि प्राप्तकाले लोट् व्यत्ययेन मध्यमपुरुष उत्तमास्थाने
भविष्यति अतउभयमेकेनैव कर्त्तव्यमिति प्राप्ते आह यथा प्रेषितमन्यः पराधिकारात् यथा
प्रेषितं प्रोक्षणपासादनादिकं तदन्यः करोति अन्यश्च प्रैषं करोति कुतः पराधिकारात् परस्य
ह्यसावर्थः परमन्यमेवाभिचिक्रुस प्रैषः प्रवर्त्तते नहि कश्चिदात्मानं प्रेषयतीदं कुर्विति तर्हि प्रे
षण एव कुतः संप्रैषणे वै ष इति वचनात् तस्मादन्यः प्रैषे अन्यः प्रैषार्थ इति एवं स्थिते इदं सं
दिह्यते किमग्नीत्प्रैषे अध्वर्युः प्रैषार्थे उताध्वर्युः प्रैषे आग्नीध्रश्च प्रैषार्थ इति किं तावत्प्राप्तमा
ग्नीध्रः प्रैषे ध्वर्युः प्रैषार्थ इति कुतः समाख्यानुग्रहात् एवं स्रुक्समार्गादिषु बहुषु समंत्रकेषु
पदार्थेषु समाख्यानुगृहीता भवति प्रैषे स्यात् अथाध्वर्युः प्रैषार्थ इति प्रैष्यपात्रे बाध्यते इतर एम
था समाख्या विरुध्यते तस्मादाग्नीध्रः प्रैषे इति प्राप्ते आह स्वयंवाविरोधात् स्वयं वाध्वर्युरेव ५४

प्रैषमात्रे बाध्यते इतरथा समाख्या विरुध्यते तस्मादाग्नीध्रः प्रैष इति प्राप्ते आह स्वयं वाविरोधात्॥
स्वयं वाध्वर्युरेव

© Dharmartha Trust J&K. Digitized by eGangotri

कुतः अविरोधान्नस्यैवं क्रियमाणेपि समाख्या विरुध्यते कथं प्रैषस्य यं रत्तसाख्यात्त्वयाप्रैषार्थो नपि
कारयति एवं प्रैषे तदर्थानुष्ठाने चाध्वर्युसंबंधस्य विद्यमानत्वात् समाख्यानं विरुध्यते कुतः त
मा योजको हेतु अत्र कारयतीचेति प्रयोजकत्वस्यापि कर्तृत्वस्मरणात् इतरथानुपदार्थमात्र
कर्तृत्वात् प्रैषे समाख्याबाध्येनातस्मादध्वर्युरेव प्रैषे अग्नीदग्नीन् प्रैषार्थ इति किंच संप्रैषावच
नाच्च संप्रैषेषु अध्वर्योर्वचनाद्ध्वर्युरेव प्रैषेत्स्यात् यदि चाग्निहग्घाविहरप्रति प्रस्थातः पसु
नेहि नेष्टः पत्नीमुदानयोन्नेतर्होतुश्चमसंन्नययुहि यजमानहोतारेतयजेसामवेवाध्वर्योप्रो
क्षणीरासादयेत्येवं संप्रैषमध्येएवाध्वर्योर्वचनं स्यात् तद्वावचनादध्वर्युः प्रैषार्थेस्यादपि न चैवं
तस्मादध्वर्युरेव प्रैषी अग्निन्प्रैषार्थे इति अपि च संप्रैषणेवैष इति वचनादपस्य प्रैषत्वंनिश्चितं
तनश्च अग्नीदग्नीन्प्रैषंकुर्यात्तदानि कृष्टेनोत्कृष्टस्य प्रैषणमप्रयुक्तमापद्यते तच्चानिष्टं तस्मादु
त्कृष्टोध्वर्युः प्रैषणेति न ष्टोग्नीन्नदर्थानुष्ठानइत्येवयुक्ताः सिद्धांतः जैमिनिनापिंतत्नीयस्याष्टमेए
वमेवसिद्धांतितं प्रैषेषु पराधिकारादध्वर्युस्तु दर्शनात् गौणो वा कर्मसामान्यादिति प्रैषार्थस्तु हे अग्ना
ग्नीध्रत्वं प्रोक्षणार्थी अपश्चासादय अग्निस्समिधनार्थमिध्मावेदिस्तरणार्थं बर्हिश्चाहवनीयस
मीपेसादय जुव्हाद्यास्रुचः संमार्जनसंस्कारेणसंस्कुरु यजमानस्य या पत्नी तां योक्त्रेण संनह्य व

© Dharmartha Trust J&K. Digitized by eGangotri

धानमत्स्यागच्छिमेवमाज्यंतेन सह छंदेस्यंडे वेदिदेशे आगच्छेतिमाकृत्तरणाद्देदिनावमर्शेन्
५५ माकृत्तरणादनुमार्जनादूर्द्धस्तरणाद्दर्वी वेदिं नावमर्शेन् नस्पृशेन् श्रतानि च हवींष्यासवरणा
55 न् श्रतानि पुरोडाशचर्वादीनि हवींषि वित्वावमर्शेनून स्पृशेन् आप्रचरणान्नमावन्न प्रधानप्रचरणान्न
भवनितावद्धूत्तेन न स्पृशेदित्यर्थः सेहाग्नईजिरे इति प्रकृतानि हवींषि क्रियावेदिरिति च प्रकृ
त्या क्रियमाणइत्या बर्हिषस्तरणादि तिनस्मादनवमर्शमेव यजेतेति च श्रृतत्वान् परिश्रृतं वीजमा
जीविकेत्यर्थः कृष्णारुर्हसस्कारसंस्कृता अग्न्युत्सुगमंश्रृता नातिक्लृप्तेति च विशेषो मादाना छ्रथ
मीणेषु हविःषु संस्क्रियमाणयां च वेदौ स्पर्शेन दोषः अंगुष्ठांगुलिभ्यां मांसमहिताभ्यामव
घंत्येके अवमर्शननिषेधप्रसंगात्तत्प्रतिप्रसवार्थमेतत् एके साखिनो मांससहिताभ्यां मोपल
क्षितांतः प्रदेशसंबंधाभ्यामंगुष्ठांगुलिभ्यां नखाभ्यामस्पृशंतो हवींष्यवघंति अग्नेनुश्रृतावदा।
न संज्ञेकेन वारणेन प्रादेशमात्रेणावोष्टेन तथाचोक्तं सामर्थ्यात्स्वधितिर्मांसेदृविषुस्याक्कवस्त
या हस्तकाष्ठपुरोडाशमवदातुं कल्प्यत इति अत्र स्रुवेणावघति खधितिनावघति हस्तेनाव
घति काष्ठेनावघतीति वक्तव्ये वदानसाधनीति श्रूयते तेषां सामर्थ्यादुरीस्पृशन् अवस्थाज्ञेया राम
आपन्नं गणंनिस्सेतस्तरणात्प्राग्वेदिमध्येतृणपर्णकाष्ठादियदापन्नंपतितं भवति तद्दधर्युः ५५

© Dharmartha Trust J&K. Digitized by eGangotri

स्तरणेन्नेव बर्हिः स्तरणं कुर्वन्ने वोत्कर निरस्येत्ततः प्राक्स यदि पुरा बर्हिषः स्तरणात्किंचिद्वा
पद्येत बर्हिरेव तत्कृत्स्नेन पास्येद्यथा यदा बर्हिः स्तरणं सर्वदातिति तिष्ठंतीति श्रुतत्वान् स्तरणा
त्प्राक्प्रतितत्तृणापसारणार्थं हस्तेनापि न स्पृशेत् स्तरणे क्रियमाणेनुपादेनाप्यतिष्ठानं न दो
षाये स्यर्थः द्विषतो वध इति स्फ्यमुदंचं प्रहरति द्विषतो वध इत्यनेनैव मंत्रेण ध्वर्युः प्रेषार्थमुद्यंन
स्फ्यं वज्रं प्रेषां तेउदंचं प्रहरति उद्गमनं भूमौ प्रक्षिपती स्यर्थः अथोदंचं स्फ्यं प्रहरतीति श्रुतेः उ
त्करोपस्पर्शनं चाभिचारपक्ष एव नान्यदेत्युक्तं प्राक् अत्र स्फ्यस्य प्रक्षेपणमुत्करे कर्तव्यं तथाचा
हापस्तंवः द्विषतो वध इति पुरस्तात्प्रत्यंचमुत्करे स्फ्यमुदगग्रं निरस्यति द्वेष्यं मनसा ध्यायन्निति।
मनुरपि द्विषतो वध इति पुरस्तात् प्राङ्मुखः स्फ्येनोत्करमभिहत्य संप्रक्षिप्य प्रत्यासादयतीति लौ।
गाक्षिरपि स्फ्यमुत्करे प्रत्यंचमपहत्य तत्कृष्णाहस्तावघ्नानि दधाति अग्रहस्तार्थं चैतत् इष्मस्याशसंभ
वात् प्रयाजादिवदारादुपकारकं च अतो यावदुक्तेनिवृत्तेते अग्रवनिज्य पाणी अपरेणप्रणीताः
स्तृणिदधानि ततउत्कारे पाणी अवनिज्य हस्तावुत्करेहिः प्रक्षाल्य प्रणीता अपरेण प्रणीतानां प
श्चादुत्तमीय एवस्फ्यं निदधाति आसादयत्स ध्वर्युः इध्मा बर्हिश्च पूर्वमिधाच कारेण परेण प्रणीतां
निदधाति आसादयती सनुरुष्यते आग्नीध्र इध्मा बर्हिश्चा परेण प्रणीताः प्रणीताभ्यो परस्मीदि

© Dharmartha Trust J&K. Digitized by eGangotri

शिरस्समीप एव निदधाति उपविश्य आसादधाने तत्र विशेषपूर्वं प्रथममभिधं प्रागग्रं निदधातित
५६ तो वर्हिरपि प्रागग्रमेवेध्मादुत्तरं निदधाति तथा चोपसंवः हस्ताववतिज्यस्कंभ प्रक्षलयस्त्रग्रम
56 मतिमश्शमुत्तरेणाहवनीयं प्रागग्रमिध्मा वर्हिर्निदधाति दक्षिणमित्य पुत्तरं वर्हिरिति एवमेव
सर्वसूत्रेषु विद्यते प्रणीता दक्षिणेन वाहसा अथवा प्रणीता दक्षिणेनामाहवनीयस्य वांतराले
नप्रदक्षिणामिध्मा वर्हिराहस्य निदधाति प्रणीतानां पश्चाद्देवतथा वैतेत्तिरिसूत्रं आहरं सेतद्व
र्हिरंतरेण प्रणीताश्चाहवनीयं चेति अप्रमवायार्थोपंपत्नः क्व वंप्रतप्यपूर्ववहूदागेनरंतरतःप्रा
कसंमार्ष्टि निशितइति विपर्ययस्य वर्हिर्मूलैः प्राडुःक्रम्य ततो ग्नीत्कवं पूर्ववदिति प्रस्कष मिस
नेन मंत्रेण निष्टप्तमिसनेनवा मंत्रेण गार्हपत्ये प्रतथा व उपस्पृश्य ततो ग्निदेशात् प्राडुःक्रम्य प्राच्या
गत्वा वेदाग्रे रग्ने प्रतिपत्तिविधानार्हे दामथ्य कतेरंतर नो मुखप्रदेशे स्त्रुवं प्राक्त्त नाथ्विवेदाग्रे
मूलाद्दारस्याग्रपर्यंत उपरि प्रदेशे प्रांचं संमार्ष्टि माजीनेन तज्जंलग्नंरलः पातयती त्यर्थः अप्रतिशि
तोसीति मंत्रेण एवमुपरिभागे संमार्गानंतरंतमेव स्त्रुवे वहिर्वुध्नप्रदेशे वेदस्य मूलैः विपर्ययस्य सं
मार्ष्टि देशभेदास्तु नएष्यनेनेवा निशितइति मंत्रेण विपर्यस्येति प्रागिस्यस्य विपर्ययमाहतेन प्रस राम
गिताग्रिसे माद्दारभ्य वुध्नपर्यंतमित्यर्थः देशभेदाश्च मंत्रा दन्ति भेवतितथा वदर्शयस्यग्नि संमार्गे ५६

© Dharmartha Trust J&K. Digitized by eGangotri

तूष्णीमुपरीति। अत्र देशभेदादाग्नेयो मंत्रस्तूष्णीमित्यनेन वार्यते नैवं तावता देशभेदे मंत्रावृत्तिर्भ
वतीति प्राङ्क्रमणं च संमार्गमात्रेण प्रतपने कृतः सर्वैस्तथैव संमार्ज्याद्यथाग्निं नातिक्रामेदिति
प्रकृत्य प्राङ्क्रमणं चैवोक्तमित्युक्तेः प्रतपनं तु पश्चात्स्वस्थानमागत्यैव कार्यं अथ स्रुचमादत्ते
नं प्रतपति प्रत्युष्टमित्यादिकं सर्वं श्रूयते अतः पूर्ववदित्यनेन नैवेकल्पिको मंत्रो इति दिशति प्रत
प्य प्रतप्य प्रयच्छति यस्य स्रुवादेः संमार्गो विहितो विधास्यते च तस्य तस्य संमार्गानंतरं तत्प्रत
प प्रतप्यास्त्रुर्यवे प्रयच्छति समर्पयति ततश्च स्रुवस्य पूर्वं प्रतपनं ततः प्राङ्क्रम पयोक्तः संमार्गः
पुनः प्रपथोक्तः संमार्गः पुनः प्रतप्य समर्पणमित्येते संस्काराः भवंति अत्रेषपक्षे अध्वर्योः प्रतपा
नानुष्ठाने चाग्नीदग्नीधे समर्पणं वीप्सया प्रतपनस्य स्रुगादि सर्वपात्रविषयता गम्यते तेन स्रुगा
दीनामनंतरं प्रतपनं भवति सर्वे संमृज्य संमृज्य प्रतप्य प्रयच्छतीत्युक्तेः पूर्वं नु स्रुवस्यैव विशे
षविधानात् न स्रुगादीनां अनिशितेति स्रुवः अनिशितासीत्यनेन मंत्रेण जुह्वाद्याः स्रुवः संमा
र्ष्टि स्रुववद्देववदेवाग्नेरंतरतः प्राक्क्रम वेदमूलैर्बहिः प्रसंगिति प्रथमं जुह्वाः संमार्गः ततः प्रतपनं
अप उपस्पृश्याध्वर्यवे समर्पणमिति तत एवमेवोपभृतः एवमेव स्रुवाया इति वेजिनी चेति स्रुवा
वमिति श्रुतत्वात् तूष्णीं प्राशित्रहरणं प्रतावदानं पात्री च स्रुवो संमार्गानंतरं तूष्णीं प्राशित्र

© Dharmartha Trust J&K. Digitized by eGangotri

हरणं संमार्ष्टि ततः प्रतप्य प्रयच्छति अविशेषाद्द्वयोरपि संमार्गः एकवचनं तु जात्यपेक्षं ततः प्रा-
५७ नावदानं जुह्वीं संमृज्य प्रतप्य प्रयच्छति ततः पात्रीमिति अविशेषोपदेशात् पुरोडाशपात्र्योरिडा-
पात्र्याश्च क्रमेण जुह्वाः संमार्गप्रतपनसमर्पणानि जुहूप्रतपने वोदकोपस्पर्शनाभावः रक्षो-
दैवतमंत्रोच्चारणाभावात् तच्च काण्डनिधानात् प्रभृति मांसावदानार्थस्यास्त्रस्यानापस्यास्त्रवच-
र्मलाभः ततश्च स्रुवसंमार्गानंतरमसेः पूर्वं स्रुवमंत्रेण प्रतपनं अनिशितोसीति संमार्गः पुनः
प्रतप्यापउपस्पृश्य समर्पणमिति वसाहोमहवन्याः प्रवरण्याश्च जुहूवत् जुह्वीं संमार्गप्रतपने
अन्येषामपि जुहूस्थानापन्नानां भूर्यर्कि पर्णोद्दीहनौदुंबरस्रुवादीनां जुहूवदेव संमार्गप्रतपन-
समर्पणानि पृषदाज्योपभृतस्थोपन्नद्दृत् मेक्षणस्य प्रतावदानवत् वाजिनभांडस्य पुरोडाशपा-
त्रीवदिति संप्रदायः ननु विचारणीयं उपदेशातिदेशयोरभावात् आपस्तंबादिसूत्रेषु वेदाग्रैर्वे-
दाग्राणामेव मूलैश्च सपात्राणां संमार्ग उक्तः कर्काचार्यैरप्येवमेव व्याकृतमस्ति मूलैरिति वे-
दाग्रमूलैः अन्ये तु वेदाग्रैर्वेदमूलैरिति व्याचक्षते तेषामयमाशयः सर्वा अग्रैरंतरतः संमार्ष्टी-
ति मूलैर्बाह्यतः इत्यत्र कस्याग्रैः कस्य मूलैरित्यपेक्षिते तत्राणेदिकुशाग्रब्रह्मयजुरिति वाक्यशे- राम
षात्कुशाग्रैः कुशमूलैरित्येतावत् प्रतीयते तथा न तद्देकेरूकसंमार्जनान्यन्नाकम्पादघतिवेद्र ५७

© Dharmartha Trust J&K. Digitized by eGangotri

स्यादभूवन्निति वा क्वचिच्छेषाद्वेदस्याग्राणि वेदस्य मूलानीति गम्यते हरिस्वामिनस्तु अग्रैरिति व।
चनाद्वेदाग्रहणं मूलैरिति वचनान्मूलानां अमन्तरस्मिन्नहा। ते उभयं न संभवतीत्युभयमग्र
हणं मूलं हि परिच्छिन्नाग्रं परिच्छिन्नमूलं चाग्रमिति सूत्रे तु वेदाग्रैरिति समस्तास्वदात्केवलं वेद
परं निः कार्यं मूलैरित्यनेन याजपि तु दुःशकं तेन संनिधानाद्वेदाग्रमूलैरिति कवीवा पैभ्यी।
ख्यातं आपस्तंबसूत्रे विशेषः पत्नीसंनहनमेके पूर्वं समामनन्ति स्रुक्संमार्जनमेके इति त।
था आहवनीये गार्हपत्ये वा प्रतितप्येति वेदाग्राणि प्रविश्य प्रविश्य वा तेः स्रुवः समार्ष्टि माञ्जीरु
ह्रीवीर्वेशानां धारयमाण इति तयानसंप्रश्नान्यसंप्रष्टैः संस्पर्शयतीति व पुनः प्रतितप्त्यो स्याग्रे
ण त्सरद्दर्भेषु सादयति जघनेन विति संप्रष्टा यथास्थानमुत्तानीः स्रुचः सादयतीति मानवे सं
मार्जनान्यग्नावस्यति सर्वसंमार्गीनं तरं संमार्जनानि संमार्जनसाधनानि वेदाग्रमूलान्युत्करे प्रा।
स्यति प्रक्षिपति तस्माद्युपरस्मिदेवैतानीति वचनान् आहवनीये प्रासनमेके एकेशाखिनः स्रुक्
संमार्जनानां वेदाग्रमूलानामाहवनीये प्रासनं प्रक्षेपं कुर्वन्ति तदुक्तेः स्रुक्संमार्जनान्यग्नावभ्या
दधनीति श्रुतेः आपस्तंबः संमार्जनान्यहिः संस्पृश्याग्नौ प्रहरति प्रस्मिन्नत उत्करे वेति
पत्नीं संनह्यति प्रसन्नद्धस्मि प्रेत उपविश्य गार्हपत्यस्य पुंजयो क्षेणान्निवृत्ता परिहरस्सधीवासो

© Dharmartha Trust J&K. Digitized by eGangotri

दित्येरास्तेतिनतोग्नीन्गार्हपत्यस्य पश्चात् दक्षिणतो नैर्ऋत्यां दिश्येशानदिङ्मुखीमुपविश्य प
५८ त्नीं यजमानस्य भार्यां त्रिवृतां त्रिगुणेन मुंजमयेन योक्त्रेण संनह्यति बध्नाति कथं संनह्यति ५:८
58 अदित्यै रास्नासीति मंत्रेण तद्योक्त्रमधोवासः वससो बहिः परिहरन्ति परितो वेष्टयति अथ पत्नी
ः संनह्यतीति पक्षे स योक्त्रेण संनह्यति सवा अभिवासः संनह्यति स संनह्य सदित्यार ति
नथा सा धेयश्चात्मा वै यज्ञमचासीत्तात्तस्माद् दक्षिणर्द्वे वांवा सीनेति वक्ष्यते आपस्तंवः
आपरेण गार्हपत्यस्य मूर्द्धन्तु मासीनां पत्नीं संनह्यति तिष्ठन्तीं वेति अनेकाश्चेज्ञ वी सांसत्रहनंत
वै तत्संनहनं नाभेरधः कटिप्रदेश कर्त्तव्यं कुतः अमित्रं वै पत्न्या अमेध्यं यद्वाचो नंनो भेरथै
तदाज्यमवेक्षिष्यमाणा भवतीति तद्देवास्या एतद्योक्त्रेणान्तर्द्धाय मेध्यैनैवोत्तरार्द्धेनाज्यमवे
क्ष्यत इति वाक्यशेषात् दक्षिणं पाशमुत्तरेशेशं कुस्थानीयं प्रतिमुच्य ग्रीतरेणपित्वा ततः सी
मर्थ्यां द्विगुणं वेष्टयित्वा तं दक्षिणं योक्त्रपाशं मूर्द्धसु दूहति वेष्टिते योक्त्रे एवमेरयति विस्नोर्वे
ष्यइनि मंत्रेण ऊर्द्ध्वमेवोद्गूहति विष्णोर्वेष्योसीति स्वतः संलग्नं त्रिगुणाकृतमुत्तमीरन्तुमभितः
म वर्णं तथि त्रयपुक्तमंतयोः पाशग्रंथिद्वयपुक्तं योक्त्रतेन वध्नातीति द्वारिस्वापिनः तथा संन एम
ह्यतीति वचनाज्ञमं ततो नहनं वाससमुपर्यवेसपित्वा ऊर्द्ध्वं योक्त्रमधोग्रद्रति उर्द्ध्वयोक्त्रमधो ५९

प ५ प्रतिमुच्योर्द्ध्वमुत्सृजति विष्णोर्वेष्यइति परितोवेष्टि नाद्वनंनर भग्नि देवस्यायोक्त्र्य दक्षिणं पाशमुत्तरेणा

© Dharmartha Trust J&K. Digitized by eGangotri

गृह्णन्सीमर्थ्यान्न्द्विर्वेष्टनं एकवेष्टने उद्वहनस्याशक्यत्वात् नमनं यथिं करोति यो ऽक्ष्वं धनं कुर्वन्नग्नौ
ह्नथिनकनोति स वै नमथिं कुर्यादिति श्रुतेः ऊर्जे त्वेत्याज्यमुद्वास्य पत्नीमवेक्षयत्यस्य द्ववेनेति वेदं स
व्ये नग्रहीत्वा ऊर्जे त्वेत्यनेन मंत्रेणाग्नी दाज्यमुद्धृत्य पुरोडाशाभ्यां पूर्वत आनीयो त्तरतो भूमौ निधा
यततस्तदाज्यं पत्नीमवेक्षयति णिजंतो पदेशात्स्त्र्याज्यमवेक्षस्येत्यध्येषणा सा च वेदहस्तेग्रही
त्वा दद्धेनेति मंत्रेणाज्यमवेक्षते अथाज्यमवेक्षते इति प्रकृत्य समावेक्षते ददृवेन त्वेति श्रुतेः आपस्त
वः ऊर्जे त्वेत्याज्यवेदेनोपयम्य पत्न्या उपाहरति तत्सानिमीत्य वीक्षानुद्धसंती वीक्षत इति मानवे च
वेदेनोपयामा द्वयेति पत्न्याज्यमवेक्षत इति नद्येतदाज्यावेक्षणं परार्थत्वाद्वनेकपत्नीके एकैव करोती।
ति कर्कः अथ यस्य त्रीणाव्रकाश्यपे दंत रीयाहूयज्ञास्तन्नामिति वाक्यशेषात्तु सर्वा अथाज्यावेक्षणं कु
र्वंतीति गम्यते पितृयज्ञे वाध्वर्युरेवावेक्षयते अंत्यसंस्कारस्यामितिषिद्धत्वात् एवं रजस्वलायां प्रसू
तायां प्रोषितायां वा तत्र यं सावेक्षते द द्वेन त्वेति वचनाद्वेक्षणएव मंत्रानर्थे लग्नेवेधां करोत्स परं
प्रोक्षणीभ्यः पत्न्यवेक्षणानंतरमग्नौ दाज्यं नीत्वा प्रोक्षणीसोपरं आसादितानां प्रोक्षणीनां पश्चद्दृष्टं
करोति उपविश्य आसानादयती स्त्यर्थः अथाज्यमादाय प्राडुदाग्नं द्रवति नद्वंत र्वेधासादयतीति श्रु
तेः आहवनीये वा कृत्वात ब्राह्मिणः तत्प्रापिणइत्याह वणीय आपिणीयजमानस्य पत्न्यवेक्षणानं

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मादाज्यमाहवनीये कृत्वा आहवनीयं विश्रित्य पुनरुद्वास्य प्रोक्षणीभ्यः परं वेद्यां करोति वाशब्दो
५९ ऽव्यवस्थायां आहवनीयस्यापि एवमेव कर्तव्यं गार्हपत्यस्यापि णस्तु भागुक्रमेवं कुर्तव्यस्याव
59 स्येति वेन आहवनीयस्यापि णोति स्यमेव मेवश्रूयते अथाज्यमादाय प्राङु दाद्रवति तद्दाहवनी
ये धिश्रयति यस्माहवनीये हवींषि श्रपयन्ति सर्वे मेयज्ञ आहवनीयेष्वतो सद्दिति तथान त्वत
आदधेते तेन वेद्यां सादयतीति व सवितुस्त्वे साज्यमुत्पुनाति वेदमुपगृह्य सवितुस्त्वे स नेन मंत्रे
णाध्वर्युर्वेद्यामासादितमाज्यं पवित्राभ्यामुत्पुनाति प्रोक्षणीषु पवित्रे भवतस्तेतत आदत्ताभ्या
माज्यमुत्पुनातीति श्रुतेः प्रोक्षणीश्च पूर्ववत् प्रोक्षणीश्च पूर्ववदुत्पुनाति पूर्ववदिति पवित्राभ्यां
सवितुर्व इति मंत्रेण सकृत्पयगृहेण चकारउत्पुनाती तस्यानुकर्षणार्थः कर्काचार्यास्तु चकार
दाज्यवत्पूर्ववेदवनस्य तथा आज्योत्पवने पवित्रे प्राप्ये ते इति व्याख्यातवंतः प्रोक्षणीनां पुनरु
त्पवनमिध्माबर्हिषोः प्रोक्षणार्थम् अतश्च तदभावे न भवति आज्यमवेक्षते तेजोसीति अध्वर्युरा
ज्यमवेक्षते विलोकयतीति तेजोसी स नेन मंत्रेण अथाज्यमवेक्षत इति श्रुतेः यजमानो वा यजमा
नो वा आज्यमवेक्षनेते तेजोसी स नो ते तद्दे के यजमानमवपयंतीति तस्मादध्वर्युरेवावेक्षेते तत्क्रमयथा एम
श्रुतत्वाद्विकल्पः श्रुवेणाज्यग्रहणं अत्र यदी जग्रहणं तत्स्रुवेणैव कर्मभंसामर्थ्यात् चतुर्जु। ५९

© Dharmartha Trust J&K. Digitized by eGangotri

ह्णा धामनामेति सकृन्मंत्रः जुह्वां चतुराज्यग्रहणे च चतुःस्रुवाग्मूलीन्नगृहीयादित्यर्थः तत्र
धामनामेत्ययं मंत्रः सकृत्प्रयोज्यः प्रथमस्रुवग्रहणे एव स एतेन यजुषा सकृज्जुह्वां गृह्णातित्रि
स्तूष्णीमिति श्रुतत्वान्न ग्रहणान्तरे वनेत्यादिना ज्यग्रहणे प्रतिग्रहणं मंत्रः प्राप्नोति तत्रानेन व
चनेनोत्तरेषु ग्रहणेषु मंत्रो निवार्यते ननु चैतदपि प्रागुक्तमेव वचनादाज्य इति सत्यं अत्र स
कृन्मंत्र इति पुनरेवं भोवाकाद्दूषणापनार्थः स एतेन यजुषा सकृत् जुह्वां गृह्णातीत्येकं वाक्यं
तदाहुस्त्रिस्त्रिर्वा यजुषा गृह्णीयादित्यपरं तेनाज्यग्रहणे त्रिर्मंत्रवचनं सकृन्मंत्रवचनं पि तिवि
कल्पः सिध्यति तत्र सकृन्मंत्रवचनमत्र विधीयते त्रिर्मंत्रवचनं तु परिशेषात्परिभाषायां सिद्ध
मिति तेनेति सूत्रे प्रोक्षणोत्पवित्रे अवधायादन्ते दक्षिणेन स्रुवेसव्येन जुहूं वेदमति श्रापतस्यां
गृहीत इति अथ पृउपभृत्सत्पीयोनुयाजाश्चेन् चेद्भवंति अनुयाजाभवंति तदाउपभृत्स्थो स्रुवधाना
अंनगृहीतत्वात् उपभृत्साज्यमत्मीयः जौहवादाज्यादतिशय्येनात्यंगात्यंसयद्व तुर्जुह्वां गृहूनूय॥
अथाज्यगृह्णा सम्प्रो कृष्टउपभृति गृह्णान् कनीयश्चाज्यगृह्णातीति श्रुतेः स एतेन यजुषा सकृद्द
उपभृति गृह्णाति सप्तकृत्वस्तूष्णीमिति श्रुतेरत्रापि सकृदेव मंत्रः इहानुयाजानां निसत्वान्नष्टकृदे
विकृतिविषयः चतुरव्यत्रप्रतिविभागान् अप्रयत्नानुयाजवत्कर्मणोन्यस्मिन् कर्मणि अनुया

© Dharmartha Trust J&K. Digitized by eGangotri

जाभाववति ऽन्यत्र त्वानुयाजके चोपभृति चतुरेव चतुर्गृहीतमेव गृह्णात्वं कुतः प्रतिविभागा
६० त् । ॐ उपभृतस्याज्यस्य प्रयाजेष्वनुयाजेषु च यतः प्रतिविभागेनोपयोगो दृश्यते ऽर्द्धं प्रयाजेषू
पयुज्यते ऽर्द्धमनुयाजेष्विति । अत उपभृतस्योभयार्थत्वं गम्यते तेन यत्रानुयाजाभावः तत्र प्र
याजार्थमेव चतुर्गृहीतं भवतीत्यभिप्रायः । किंच पश्वातिथ्यादर्शनाच्च पशावातिथ्यायां चोपभृ
ति चतुर्गृहीतस्य दर्शनाच्चैवं गम्यते यदनुयाजाभावेऽन्यत्र त्वनुयाजकेष्वनुयाजेषु चोपभृति चतुर्गृहीत
मेव गृह्णीयादिति पशौ तावदन्यत्र त्वाकथनुयाजेषु सत्सु उपभृति चतुर्गृहीतं श्रुतिर्दर्शयति
ऽथो सूपयाजं चतुर्गृहीते जुह्वां चोपभृति चगृह्णाति यं चगृहीतं पृषदाज्यमिति तथा ऽऽति
थ्यायामनुयाजाभावे सर्वमेव चतुर्गृहीतमाज्यानि गृह्णाति न ह्यत्रानुयाजा भवन्तीति । अत्रा
नुयाजार्थत्वं चतुर्गृहीतेन प्रयोजनाभावात् प्रयाजार्थमेवमात्सं चतुर्गृहीतं दर्शयति तत्कृत्स्नोप
देशात् । नैतदेवं यदुक्तमुभयार्थमेतदिति कुतः कृत्स्नोपदेशात् । उभयस्य समानस्याप्यष्टगृही ।
स्यानुयाजार्थत्वेन श्रुतानुपदेशात् । अथ यदष्टौ कृत्व उपभृति गृह्णातीति प्रकृत्यानुयाजेभ्यो हि
तद्गृह्णातीति तन्नोक्तं प्रतिविभागादिति । अर्द्धस्य प्रयाजेषूपयोगोऽर्द्धस्यानुयाजेष्विति सत्यं । अनु राम
याजार्थस्यैव तत्रो वचनात् प्रयाजेषूपयोगः । यथा प्रयाजार्थस्यैव जौहवस्य वचनादुत्तरेण परिनू ६०

© Dharmartha Trust J&K. Digitized by eGangotri

क्षेः पश्वातिथ्ययोर्दर्शनादिति तत्राह पश्वातिथ्ययोर्वचनान्यदा वाक्येन कृत्स्नस्योपभृतस्यानु
याजार्थत्वं तदा पशावातिथ्यायां चाष्टगृहीतमेवोपभृति प्राप्नोति अनेन वचनेन तत्र चतुर्गृहीतं
विधीयते अतो विधानमेतत्तद्दर्शने तद्धि प्राप्तिपूर्वकं भवति प्राप्तिश्च नास्त्येकमेव अस्मिन्
सिद्धंति वरुणप्रघासेषु महाहविषि च प्रयाजार्थं पृथगुपभृति न गृह्यते पृषदाज्यादेव समा
नीय प्रयाजाः क्रियन्त इति विशेषः अत्र क्रमः स्यादेतदेवं यदि कृत्स्नोपदेशो भवति सकलमप्यौप
भृतं यदि केनचिद्वाक्येनानुयाजार्थमुपदिश्येत न तूपदिश्यते यतः शाखान्तरे एतदुभयार्थं श्रू
यते यद्द्वौ कृत्स्न उपभृति गृह्णाति प्रयानुजायाजेभ्यस्तं गृह्णातीति न तु प्रयाजार्थतापि सकृत्तस्य
श्रूयत एव अनुयाजेभ्यो हि तं न गृह्णातीति सत्यं शाखान्तरे उभयार्थत्वविधानादेकदेशानुवादः
सति ननु विपरीतं कुतो न भवति अनुयाजार्थत्वबोधकं विधायकमुभयार्थबोधकमनुवादकमि
ति नैवं अनुयाजेभ्यो हि न गृह्णातीत्यनेन सकृत्स्नानुयाजार्थत्वे विहिते प्रयाजार्थप्राप्त्यभावा
त्प्रयाजानुयाजेभ्यो हीत्यान्तेनोभयार्थतानानुवदितुं शक्या उभयार्थत्वबोधकवाक्येन विधाने
कृते इतरेण प्रयाजप्राप्तानुयाजांशोऽनूद्यत इत्यदोषः अतः कृत्स्नस्यानुयाजार्थत्वेनोपदेशा
भावान्नोभयार्थमेवोपभृतमिति सिद्धं पश्वातिथ्ययोरपि वचनं तदैव स्याद्यद्यौपभृतस्य वाक्या

© Dharmartha Trust J&K. Digitized by eGangotri

६१ 61 दृभयार्थत्वानस्यात्तत्स्रुवोभयार्थतापूर्वमेवसाधिता ऽअतऽआतिथ्यायांप्रशंसेवोपभृतिस्रुवतु
गृह्णातमेवमाग्नौमानि ऽअतःप्राप्तिपूर्वकत्वाद्दर्शनमेवैतन्नविधानमितितेनवरुणप्रघासेषुम
हाहविःषिवाहृत्वेष्वेकेष्वनुयाजेषुभयार्थमुपभृतिस्रुवतुर्गृहीतमाज्यंस्यादितिचिंतायाःप्र
योजनंप्रयाजांश्चजुहूवनप्रयाजांवजुहूवदाज्येगृह्णीयात्जुहूवदितिचतुर्गृहीतंसकृन्मंत्र
वचनमितितेनैवमजुष्टासकृत्प्रयाजांगृह्णातित्रिस्तूष्णीमितिश्रुतत्वात्सर्वकार्यार्थमुपभृत्यपि
जुहूवदेवगृह्णीयात्तेनोपभृत्यपिसकृन्मंत्रवचनयुक्तंभवतित्रिर्मंत्रवचनेनसेवजुहूंप्रया
जांश्चतुर्थंतूष्णीमुपभृतिच आपस्तंबः भूयोजुहूमल्पायउपभृत्यल्पिष्वप्रयाजायामिति।
इध्मं प्रोक्षतिविस्रंस्यवेदिंबर्हिःप्रतिगृह्यवेद्यांकृत्वापुरस्ताद्ग्रंथिंकृष्णोसीतिप्रतिमंत्रंइ
ध्मंवेदिंबर्हिश्चकृष्णोसीत्यादिभिःप्रतिमंत्रंक्रमेणप्रोक्षतिकथंप्रोक्षतितत्रेध्मंविस्रंस्यतत्र
स्थमेवकृष्णोसीसनेनप्रोक्षतिप्रोक्षणीरद्धमुदरत्नेसद्यप्यमेवाग्नेप्रोक्षतिस्यात्तत्पाकृष्णो।
सीतिश्रुतेः अग्नेमथममभिसर्थः ततोवेदिरसीतिश्रुतेः अग्नेमथममभिसर्थः ततोवेदिरसीति
वेदिंप्रोक्षति अथवेदिंप्रोक्षति खदिरसीतिश्रुतेः ततोवर्हिःप्रतिगृह्याग्नौधासमर्पितंहस्ते राम ६१
नाहोपुरस्ताद्ग्रंथिपथावेद्यांकृत्वादगग्नमासाघबर्हिरसीतिमंत्रेणप्रोक्षतिअत्रप्रतिगृह्येति
य

मतिपूर्वकोग्न्युद्धातिरन्यसमर्पितस्मात्तदानेव वर्त्तते तथा च श्रुतिः अथास्मै वर्हिः प्रयच्छति तत्पुरस्ता
द्ग्रंथ्यामासादयति तत्प्रोक्षति वर्हिरसीति तत्र त्रेधा प्रोक्षणेन स्रुवविधेः प्रोक्षिष्यामीत्यामंत्रणं ॐ प्रो
क्षेत्यनुज्ञा तस्य प्रोक्षणं वेदिं प्रोक्षणे च स्रुवं वर्हिः प्रोक्षिष्यामीत्यामंत्रणं इतरदिध्मवत् वेदि
प्रोक्षणे त्वामंत्रणानुज्ञे न भवतः अविहितत्वात् वरुणप्रघासेषु प्रस्तरनिधौ प्रोक्षिष्यावः प्र
स्तरं वर्हिषी प्रोक्षिष्याव इत्यूहः इध्मस्याग्निसमिंधनार्थस्यैव प्रोक्षणं अग्नये त्वा जुष्टं प्रोक्षामी
ति मंत्रलिंगात् तन्मध्यमेवैतद्गतये करोतीति वाक्यशेषाच्च अतश्च शतरुद्रिये परिधूपस्या
र्थनार्थस्येध्मकाष्ठस्य न प्रोक्षणं अग्न्यर्थत्वाभावात् वेदेरपि स्तरणार्थमेव प्रोक्षणं वर्हिषे त्वेति
मंत्रलिंगात् तन्मे आमे वैतद्वर्हिषे करोतीति वाक्यशेषाच्च अतश्च पशौ वपास्थाने स्तरणाभावे वेदिप्रो
क्षणाभावः उपसत्स्वग्नीषोमीये च स्तरणाया अपि पुनरेकवत् स्तरणं क्रियत इति भवस्येव तत्र प्रोक्ष
णं वेदेः वर्हिर्मंत्रे स्रुक्त्वेयस्य वहुवदानस्य समवायान् स्रुग्भ्यां त्वेत्कूच प्रोक्षूहः तश्च गृहमेधीयेग्नी
त्वेति प्रयस्यां यां चानूवंध्यास्थानीयायां प्रस्तरमात्रे वर्हिषि स्रुक्च त्वेति प्रयोगः ज्योतिष्टोमे शाक
टे वर्हिषि प्रयस्यापक्षे स्रुग्भ्यां त्वेति प्रयोगः पशौ स्थाने तस्मिन् वर्हिषि उपकृतं क्रव्ययोरासादना
न्तयेषां मतेयप्रस्याया मुपभृद्भावः तेषां शाकटे वर्हिषः स्रुवे त्वेति प्रोक्षणं अनूवंध्यापक्षे तु वर्हि

© Dharmartha Trust J&K. Digitized by eGangotri

६२ रसित्वाजुष्टमसि सेवं स्कन्नकारस्य प्रयोगे वर्जित एव मंत्रः। कुतः शकटवर्हिषि स्कन्नासादनाभावात्।
न कुतः अग्नीषोमीयसवनीयानूबंध्यासु पुनरेकहस्तरणविधानात्। नैष्टिरस्तत्रे। आ हरं स्तसे तद्व
62 र्हिरंतरेण प्रणीताश्चाहवनीयं च तदं तर्वेदि पुरस्ताद्ध्व्यासादयमोक्षणीति अत एव प्रणीता दक्षि
णेन वाहस्तेनकृतं शेषं मूलेषूपसिंच स्वदित्स्यै कं दूनमिति वर्हिषः प्रोक्षणानंतरं प्रोक्षणीशेषं वर्हि
मूलेषूपसिंचति निनयते अदित्यै कंदनमिति मंत्रेण तथा च श्रुतिः अथ याः प्रोक्षण्यः परिशिष्यं
ते ताभिरेव प्राचीनां मूलान्यपनिनयत्स्वदित्सा इति अत्र मूलानीति द्वितीया मूलानां संस्कार्यत्वं गम्य
ते ताभिरिति तृतीयया वा यां तत्र करणत्वं सूत्रे तु विपरीतं तत्र सूत्रस्य श्रुतिमूलत्वाच्छ्रुत्यनुरोधेनैने
व तद्व्याख्येयं ततश्च नेमं शेषस्य प्रतिपत्तिः अतश्च नाशद्वोषाद्वो पुनः प्रोक्षणीहस्तादपमूलोपसेच
नं कर्तव्यं शेषशब्दप्रयोगस्तु समस्तानां निषेकार्थः पवित्रे निधाय प्रणीतासु वर्हिर्विस्त्रंस्य पुर
स्तात्प्रस्तरग्रहणं विष्णोरिति मूलोपसेवनानंतरमध्वर्युर्हस्तेन प्रणीतासु पवित्रे निधाय ततो वर्हि
र्विस्त्रंस्य तस्य वर्हिषः पुरस्तात्पूर्वभागाद्विष्णोः स्तुपोसीति मंत्रेण प्रस्तरग्रहणं निःकाशनं करोति
स वायं मूलकात्प्रस्तरस्य पृथक्करणे मंत्रः अथ यद्विस्त्रंस्य ग्रंथिं पुरस्तात्प्रस्तरं गृह्णातीति विष्णो राम
स्तुपोसीति श्रुतेः तेनान्यपयस्यायां गृहमेधीये पित्र्यायां च नायं मंत्रः पृथक्करणाभावात् पृथक्कृ ६२

© Dharmartha Trust J&K. Digitized by eGangotri

णएव तत्रासादितपित्र्यायां च हस्तगृहीतोपि प्रस्तरमात्रं शिष्टस्फ्यक्ते: ब्रह्मणे प्रदाय सन्नहनं विस्र
ंस्य दक्षिणस्यां वेदिश्रोणौ निधाय पाश्चिरवच्छाय वेदिं स्तृणीहर्णम दसपितित्रिवृतं नं गृहीतं प्रस्त
रं आहवनीयं पूर्वेण नूस्मी ब्रह्मणे प्रदाय समर्णवर्हिषः संनहनं बंधनरज्जुं विस्रंस्य विमुच्य रज्जु
स्यपत्वं परित्याज्य दक्षिणस्यां वेदिश्रोणौ प्रागग्रमुदगग्रं वा पश्चात्संभवं निधाय प्रस्तुताद्वर्हिषो न्मे
वर्हिस्तरणे स्तस्त तं सन्नहनमवच्छाद्य प्रच्छाद्य पश्चिदसमिति मंत्रेण त्रिवृत्त्रिधातु वेदिषु वर्हिस्त
णाति आच्छादयति अथ सहनं विस्रंस्य पतितं दक्षिणमांसं श्रोणौ निदधाति तमुनरपि छाद
यति अथ वर्हिःस्तरणान्ति त्रिवृस्तरणानीति तन्त्रकल्पात् पितृयज्ञे चरखास्यांदेवपितरः इत्यूहः
मनुः अग्नेराहवनीयं परिप्रदूसप्रस्तरं ब्रह्मणे प्रयच्छति तथामुष्मतः प्रस्तरं गृह्णाति नोरज्यात्र्या
वमज्यान्न विधूनुयादिति ब्रह्मा प्रस्तरं धारयति यजमानो वेति चापस्तंबः ऊयपक्ष्यासावा वाशद्दो
विकल्पार्थः नत्रिवृदिस्सयं नियमः उपयत्सा वृद्धस्तरणानियावतीति संहिवेदेः स्तरणमाच्छा
दनमुपपद्यते संपद्यते तावद्दास्तरणीयं यचार्तत् सप्राव्त्त वेति तहि अपरिमितादिपक्षे पशुसो।
मादौ वत्रिवृस्तरणेन सकलवेदेश्छादनमुपपद्यते तेनेदमुक्तं उपपत्त्या अमुष्माआदतो भवं
तीति अतएव शाखांतरे श्रूयते अयुग्धातु वेदिं स्तृणातीति त्रिधातु पंचधातु वौ वेदिस्तृणातीति व

© Dharmartha Trust J&K. Digitized by eGangotri

बहुलं बहुलं निविडं घनं निरंतरं बर्हिस्तरणं नियथाभूमिर्न दृश्यते तद्वै बहुलं स्तृणीयादित्या
६३ हुरिति श्रुतेः अचरमूलं अचरमूलं स्तरणमिति अधराणि अधस्तान्मूलानि यस्य तदधरमूलं पू
र्वस्तृतस्य बर्हिषो मूलानि पश्चात्स्तीर्यमाणबर्हिषोऽग्रैः प्रच्छादनीयानीत्यर्थः अत एव श्रुत्यंतरे
63 उक्तं मूलान्यग्रैः प्रच्छादयतीति पश्चादपवर्गं पश्चादपवर्गः समाप्तिर्यस्य तत्पश्चादपवर्गं वे
देः पूर्वभागादारभ्य पश्चिमे भागे समाप्तिर्यथा भवति तथा स्तृणीत्यर्थः तत्रैकं मुष्टिं वेदेः पू
र्वभागादारभ्य पश्चिमे भागे समाप्तिर्यथा भवति तथा स्तृणीत्यर्थः तत्रैकं मुष्टिं वेदेः पूर्वभागे
स्तीर्त्वा द्वितीयं मुष्टिं वेदेर्मध्यमभागे पूर्वस्तृतबर्हिषो मूलान्यग्रैश्छादयन् स्तृणाति ततस्तृतीयमुष्टिं वे
देः पश्चिमभागे पूर्ववत् द्वितीयमुष्टिस्तरणेन संबद्धं पूर्ववत्स्तृणीयादित्येवं स्तरणस्य समस्तकर्मस
माप्तिरित्येकः पक्षः पक्षांतरमाह प्रस्तरहस्ताद्वा शब्दोऽत्र विकल्पार्थः द्रुह उपमो वा यथा पूर्वं पूर्वस्तृत
बर्हिषोऽग्राणि प्रस्तरूढं मुत्सादयन् तेषामग्राणामधस्तात् द्वितीयमुष्टिं स्तृणाति तस्याप्यग्रा
णि प्रस्तरहस्तस्तृतीयं मुष्टिं स्तृणाति एवं च भागपंवर्गमेव स्तरणं कृतं भवति अथो अपि प्रवर्हं स्तृ
णीयात्स्तृणंति बर्हिरानुषगिति त्र्यृषिणाभ्यनूक्तमधरमूलमिति श्रुतेः प्रवर्हमिति द्रुन्हउपमे रम
प्रस्तरप्रस्तोत्साथोस्याघेत्यर्थः वेदेः पश्चिमपार्श्वे स्तीर्त्वा तस्मादग्राणि यद्यादि नोत्सायते षा ६३

© Dharmartha Trust J&K. Digitized by eGangotri

मधस्तात्स्यस्य बर्हिषो यथा मूलानि भवंति तथास्तृणीयात् तस्मात्प्रागग्रात्पश्चाद्यस्य मूलान्य

धः कुर्यादित्येवं भवतीति सूत्रार्थः आनुषंगिकानुपूर्वस्तीर्णस्योत्तरेण प्राकारस्तद्वन्नानुपूर्वमि

स्तीति भाष्यः इति हरिस्वामिनः आनुषंगमनुषक्तं परस्परं संबद्धं बर्हिरध्वर्युर्वस्तृणातीति निश्चयकारस्या

र्थः अतोऽस्मान्मंत्रलिंगात्पूर्वबर्हिषुलिंगमगतत्वात्तस्माद्यस्मात्तत्संसक्तमेवापरंमुक्तिं स्तृणीयादिति भावइ

तिभाष्यकाचार्यः आपस्तंबः वेदिं स्तृणाति बहुलमनतिदृश्नं प्रागपवर्गं प्रसगपवर्गं वा त्रिधातु पंच

धातु वाऽग्रैर्मूलान्यपि च्छादयति धातोर्वमंत्रमावर्तयतीति माननवेदिं स्तृणासपरमपरंपुम्वानुबहुल

मनाशोकमिति लौगाक्षिरपि अग्नेप्रदक्षिणमितिदक्षिणवेघं संस्तृणातिन्यूर्ध्वमुत्तरमग्रैर्मूलानिच्छादय

न्नत्युग्ममिति अयपरिस्तरणं प्राग्ग्रैः कुशैः परिस्तृणाति त्रिवृत्संवहद्वा पुरस्तात्पश्चम ममर्थपश्चा

दथपश्चान्मूलान्यग्रैः प्रच्छादयतीति अत्रोद्वासनमाहवनीयस्यापिणः आहवनीयस्यापिणोयजा

मानस्यात्रास्मिन्काले विपामुद्वासनं कर्तव्यं कुतः विरोधात् पदीदानीमुद्वासनं न क्रियते तदादव

नीयकल्पनेन्कृते सति हवींषि दह्येरन् अत एव कपालोद्वासनमपीदानीमेव कार्यं इध्मान्तमिध्म

मादायाहवनीयं कल्पयत्कापर्युपरि भस्तारं धारयन् इध्माद्द्वे काष्ठे समिव मादाय तदनंतरं ब्रह्म

णः सकाशात्प्रस्तरं बार्थी दापाहवनीयस्योपर्युपरि ष्टात्समीप एव प्रस्तरं वारय गृहीतव्यास

© Dharmartha Trust J&K. Digitized by eGangotri

मिथाकरणभूतमाहवनीयं कल्पयति कृपू सामर्थ्ये समिदाधानेन क्रमसंइंधनेन धारे ज्वालनसम
६५ र्थ्यं करोतीत्यर्थः लोकेपि काष्ठादिना पूर्वमग्निमाहत्य पश्चात्संधुक्षणं क्रियते एवमत्रापि करोति
अथाग्निं कल्पयति उपर्युपरि प्रस्तरं धारयन् कल्पयतीति श्रुतेः उल्मुके उदूहत्यनुयाजांश्चेत्
67 चेत् अर्धेनुयाजा प्रकृते कर्मणि भवंति तदा आहवनीयादुल्मुके उदूहति अपसर्पयेत् पश्चात्पय
ति उदूहनं च समूहनवद्भूमिसंलग्नयोरेव पुरस्तारणं नोत्साद्युदूहनेः प्रेरणार्थस्यैव सर्वत्र दृष्टत्वात्त
दूहनु अनुयाजानित्यनेनैव स्यैवा वेदूदूहत्वाति व्यापसद्भूहमेधीयमस्मादिविकृतिविषयः यत्रानु
याजानामभावस्तत्रोल्मुकोदूहनं न भवति अतोनुयाजार्थमेवैतदुल्मुकोदूहनं यत्रतयोः समा
सेनाहवनीयस्यायातयामतां क्रियते अनुयाजार्थतेवा एते उल्मुके उदूहंत्यनुयाजेष्विति तेपुन
रनुसंधूस्पर्शयंतीत्यादि प्रवणमत्र अतो नुयाजार्थाहवनीयसंस्कारार्थतोल्मुकयोः ततश्चोल्मुको
दूहनानंतरं आहवनीयानुगमनेनोल्मुकान्यसातयनं किंतु माहैपसादेवा चाग्निरित्यादिना पुनरा
हरणं तयोः पुनरनुसमासविस्मरणे चोत्तमानुयाजानंतरमाहवनीये समासेन कार्यः अनुया
जानां निवृत्तत्वादिति आध्वर्यवप्रायश्चित्तमात्रे होतव्यमिति परिचीत्यादिरग्नीत्याद्वीनि कस्य स्त्री एमः
णीत्वाहुमात्रात्याक्षाखकंनकानकोर्मर्यवैद्या मूर्वीलानेपूर्वगलाभउत्तरात्त्वादिरोदुं वराया ६५

© Dharmartha Trust J&K. Digitized by eGangotri

मध्यमदक्षिणोत्तराणां पर्वर्दृति प्रति मंत्रां गंधर्वस्त्वा विश्वावसुरित्यादिभिर्मंत्रैर्मध्यमदक्षिणो
त्तरांस्त्रीन्परिधीन्परिदधाति प्रातिपक्रमे कैकंकमेण कीदृशान्परिधीनत्राहीनशुष्कान्पुनः
कीदृशानु एकवृक्षीयान वक्ष्यमाणानां पलाशविकंकतादिपरिधिवृक्षाणां मध्ये एकजातीयवृ
क्षसंबंधिनः एकवृक्षीयाः नानेकवृक्षीयान् त्रीनपि पालाशान् अथवा त्रीनपि वैकंकतानि ॥
ति किमर्थमिद वक्ष्यति पूर्वालाभे पूर्वालाभे उत्तराणिति तेन एकस्य परिधेर्द्वयोर्वा पालाशयोर
त्वे जातिभेदो माभूदित्येवमर्थमेकवृक्षीयानिति अयोपि यज्जातीयाः संभवंति तज्जातीयाने
व गृह्णीयात् ननु मुख्यद्रव्यलाभे नैको द्वौ वा पालाशेष एको द्वौ वा वैकंकतावितिकिं जातीयान्प
रिधीनित्यपेक्षायामाह पालाशवैकंकतकार्ष्मर्यबैल्वान् पालाशान् पलाशवृक्षावयवान् ततो
वैकंकतान् विकंकतवृक्षावयवान् ततः कार्ष्मर्यान् श्रीपर्णीवृक्षावयवान् ततो बैल्वान् बिल्ववृ
क्षावयवान् किंप्रमाणान् बाहुमात्रान् यजमानबाहुप्रमाणानित्यर्थः प्रमाणे मात्रच् प्रसेपः बाहुः
प्रसारितांगुलिर्हस्तश्चास्कंधात् तथा पूर्वालाभे पूर्वालाते पूर्वपूर्वोक्तवृक्षजातीयानामलाभे अ
प्राप्तौ उत्तरेणोत्तरेण परिदधाति तद्यथा प्रथमं पालाशान्परिदधाति पालाशानामलाभे वैकंकतानेषा
मलाभे कार्ष्मर्यमयान् तेषामलाभे बैल्वानिति खादिरौदुंबराश्च अथवा कार्ष्मर्याभावे खादिरान्

© Dharmartha Trust J&K. Digitized by eGangotri

६५

65

खदिरवृक्षावयवा भर्तुरुदुंबराद्नुदुंबरवृक्षावयवाश्च परिधीन्परिदधातीति कुतः यदि कार्ष्मर्यम
यान्न विंदेदिति कार्ष्मर्यालाभं प्रकृत्य त्रयाणामपि वैल्वाखादिरौदुंबराणां तुल्यविकल्पतया
श्रुतत्वात्तन्नु पालाशैः सह विकल्पः कस्मान्न भवति भवति हि तत्संबंधात्तस्याविधानाविरोधा
त्पालाशाभावे वैकंकतानामुपादानं कः कुर्यात् सर्वोपि मुख्यानेकत्वखदिरौदुंबरानुपादद्वा।
त एवं पालाशाभावे वैकंकतैः सह खादिरौदुंबराणां विकल्पेपि एतदेव दूषणं द्रष्टव्यं संभवतो वैल्वैः
सह वैविकल्पः तदुक्तं तदभावे हि पालाशस्य वैकंकतविधिर्यतः तेन बिल्वविकल्पार्हौ खादि
रौदुंबराविति ते वै पालाशाः स्युरिति भर्तृयज्ञः तस्य परिपालाशान्न विंदेदथो अपि कार्ष्मर्यमयासा
यदि कार्ष्मर्यमयान्न विंदेदथो अपि वैल्वाः स्फरयो खादिराश्चथो औदुंबरा एते हि वृक्षा यज्ञिया
स्तस्मादेतेषां वृक्षाणां भवंतीति रेते वा आर्द्राः स्फः मध्यममेवाग्ने परिधिं परिदधाति गंधर्वस्त्वेतित्य
थ दक्षिणं परिदधातीन्द्रस्येति अथोत्तरं परिदधाति मित्रावरुणौत्वेति च श्रुतत्वात् पालाशादीनां
पूर्वालाभे पूर्वालाभे उत्तरोत्तराणामयं विधिः न पुनीववत्स्तति निचिनियमः तेनोत्तरोत्तरोपादाने
प्रायश्चित्ताभावः प्रतिनिधित्वे तु प्रायश्चित्तं भवतीत्ययः परिधयः पालाशकाष्मर्यखदिरोदुंब
रविल्वरोहीतकविकंकतानां येवा यज्ञियाः वृक्षा आर्द्राः शुष्का वा सत्वक्कास्य विशेषम ध्यमो णीयाधो राम ६५

© Dharmartha Trust J&K. Digitized by eGangotri

द्राघिष्ठो दक्षिणार्द्धो ऽणिष्ठ उत्तरार्द्ध इति उदगग्रं मध्यमं प्रागग्रावितरावित्यापस्तंबः संस्
ष्टान्परिधीनुपदधातीति च स एवाह परिसमंततो दधीयंते निधीयंते स्थाप्यंत इति परिधयः त
त्र यौगिको यं शब्दो न संस्कारनिमित्तो जातिनितुमो वा तत्र क्षणमीहकास्यापनः बाहुमात्राः
परिचयः रुजवः सच्चवो व्रणाः त्रयाभवं सशीर्णाग्न्या एकेषां तु चतुर्दिशमिति न तु परितो निधा
नाद्वे सरिचय इति नाम तर्हि वचारस्फः समसंमध्यगदक्षिणोत्तरा इति त्रयाणामेवोक्तत्वान्न भ
विष्यतीति एवं च सति पत्नेदृशं वचनं नान्यस्ति तत्र वचनाऐपि भवंति पथ्यापि स्मे धेवारणान्परिधीन्प
रिधाये पनु त्रय एवाहुत्वा मध्यमपरिधाविस्फक्त्वा न त्रयाणां हि मध्यमो भवति न चतुर्णां ये तु
द्वारवेष्वपि पूर्ववदिस्फक्त्वा नश्चैनो मध्यमादिशब्दः श्रवणावृत्त्रय एव रतव पारिधिपरिधा
नमहृष्णानि संस्कारार्थत्वान्न कार्यापत्नासु परिश्रित्स्वपि भवति मित्रावरुणौ चापुरस्तात्परिचन्ता
मित्येवमूहः पित्वपले इति कर्काचार्यः नितिसंप्रदायः प्रथमं परिचिं समिधोपस्पृश्य वीति
होत्रमिस्सादधाति इध्मानुग्रहीतीया पूर्वसमिन्न त्रयासमिधानेनेध्मकाष्ठेन मध्यमं परिधिमु
पस्पृश्योपविष्ट एव स्पृष्टानन्त उच्छ्रायघृतां समिधं वीतिहोत्रमित्यनेन मंत्रेणाहवनीये साद
धाति प्रक्षिपति अथ समिधमभ्यादधाति मध्यममेवाग्ने परिधिमुपस्पृशतीति तेनैतानग्ने समि

© Dharmartha Trust J&K. Digitized by eGangotri

६६ 66 येथाग्नावभ्यादधातितेनो अग्निं मत्स्यस्ख ॑ समिधेसोभ्यादधातिवीहोत्रमितिश्रुतत्वात् उप
स्पर्शनंचपरिचेः संस्वरः परिधिमितिद्वितीयभ्रवणात् अतश्चश्रुतरुद्धिधेपि भवति आह
वनीयेभ्यधानंतुदृष्टार्थं तेनो अग्निमत्स्यस्ख ॑ समिधइतिवाक्यशेषात् ततश्चश्रुतरुद्धिये
समिंचनरुपस्पष्टस्यार्थस्याभावादभ्याधानाभावः परिध्युपस्पर्शनमात्रंकृत्वा समिन्नि
रसनीयेति अनुपस्पृश्यद्वितीयां ॑ समिदसीति परिधिमनुपस्पृशैवद्ध्यादेवाराद्विती
यां समिधमाहवनीयेभ्यादधाति समिदसीत्यनेनमंत्रेणद्वितीयग्रहणेनाप्तमुपस्पर्शनंनि
षिध्यते अनुपस्पृश्येति अथयांद्वितीयां ॑ समिधमभ्यादधाति समिदसीतिश्रुतेः भूर्यरुवेति
जपस्याहवनीयमीक्षमाणस्तद्वचनात् अथर्युरुपस्पृश्याहवनीयमीक्षमाण आहवनीयंविलो
कयन् सूर्यरुवेस्यमुंमंत्रंजपति संहितारखनेन अभ्याधाय जपति सूर्यरुवेतिश्रुतत्वात्कुतए
तदाहवनीयमीक्षमाणइति मंत्रस्यतद्वचनत्वदाहवनीयवाविचात् सूर्यस्त्वेतिश्रुतत्वात्
कुतदाहवनीमंत्रस्यहे अग्ने सूर्यस्त्वा त्वां पुरस्तान्मा मां पात्विति अत्रपुरस्तात्छब्दस्यदिग्वाच
कत्वापित्त्वयज्ञे सूर्यस्त्वा दक्षिणतः पात्वित्यूहः संप्रदायकारमनेनोहः तदभिप्रायस्तुपुरस्ता राम
छब्दोग्नवचनो न दिग्वचनइति परिधिपरिधानाद्याहवनीयस्थानजपांतमिदमेकं कर्मएक ६६

© Dharmartha Trust J&K. Digitized by eGangotri

कार्यत्वात् एकं हि कार्यमग्निसंस्कारः परिधयश्चाग्निरक्षणार्थाः सूर्येक्षणजापापि न तदर्थ
मेव न त्वकृतः श्रुतेः गुप्त्यै वा अभितः परिधयो भवंत्यथ न सूर्यमेव पुरस्ताद्गोप्तारं करोतीति
प्रयोजनं नैमित्तिकमंते भवतीति आहृत्य वेदिं वर्हिषस्तरणेति रश्मीनि दधाति सवितुरिति
अध्वर्युर्वेदिं प्रत्याहृत्याहवनीयसमीपाद्वेदिसमीपं प्रत्यागत्य स्तृतस्यैव वर्हिषो द्रुत्तरणे आ
दाय सवितुर्बाहूस्थ इति मंत्रेण वेदिमध्ये स्तृतस्य वर्हिषः उपरि आहवनीयस्य पश्चात्प्रदेशे
तिरश्ची उदगग्रे इति दधाति स्थापयति अयस्तीर्णां वेदिमुपावर्त्तते सद्द्रुत्तरणे आदाय तिरश्ची
निदधाति सवितुरित्यादिश्रवणात् आपस्तंवः समावनंतागर्भौ दर्भौ विधृती कुरुते इति तथा
अंतर्वेदि प्रागग्रे निधायेति च तथा अरत्निमात्रे विधृती करोतीति सूयते कात्यायां तु तस्माद्द्रुत्त
रणे आदायेति पद्यते तेन वर्हिषस्तरणे इति सूत्रितं तिरश्ची इत्युदगग्रे अंतरेव वेदिस्तरणं प्रागग्रे
वर्हिर्तिः कर्त्तव्यं आहृत्य वेदिमित्यस्य वाक्यसामर्थ्यादेव तत्प्राप्तेः वाक्यस्यानन्तरेण निधानस्याव्यवधि
करणलाभार्थत्वात् अन्यथा हि न ज्ञायते केन द्वारेण निधीयेते इति अन्ये वायुक्तत्वात् अन्यत्र एव वा
तरणे आदायति तिरश्ची निधेयेते न स्तृतस्य वर्हिषस्तरणे कुतः अयुक्तत्वाद्व्ययोरविनियुक्तत्वात्
अन्ये हि अविनियुक्ते वर्हिषस्तरणे च वेदिस्तरणे विनियुक्ते तत्राविनियुक्तयोर्विचनं विना अन्यत्र वि

© Dharmartha Trust J&K. Digitized by eGangotri

नियोगो युक्तः यथा अथ यस्तीर्णायै वेदेर्द्वे तृणे अध्वर्युरादत्त इति तस्मादत्रोप्येवं तृणे ग्नास्थ
६७ नचत्रापि वचनमस्ति कात्यायनीयायां अथ स्तीर्णां वेदिमुपावर्त्तेन तस्माद्द्वे तृणे आदायेति न हि अ
67 त्रापि भवतु वेदितृणयोरेवोपादानं अधिकरणं तु रुचाविनावचने सति मायस्पदु वैरुच्यानन्त
हिंसायो वचनं बाधितुमीष्टे तस्मादत्र प्रकृतेवर्हिषस्तृणे एवादाय वेद्यानिधेन्नथाह चक्रहरिस्वा
मिनः अथ स्तीर्णां वेदिमुपावर्त्तेत इरूपावर्त्तनस्य दृष्टार्थत्वात् कात्यायनानां वतस्माद्द्वे तृणे आदा
येति वचनात् स्तीर्णाया एव वेदेर्वर्हिषस्तृणे ग्नास्थ इति उक्तप्रायमन्यत्रातिदिशति अन्यत्रा
पि तृणार्थे अतोन्यत्रापि पवित्रप्रभृत्याकरणम्हो पस्पर्शन श्रपणाग्निमंथनादौ तृणार्थे तृ
णकार्ये प्रस्तुताद्द्वे हिं षोन्यान्येव तृणानि ग्नास्थ्याणि कुतः युक्तत्वादेव यतः श्रुतिरेव विनि
युक्तविनियोगयन्तं करोति तस्माद्द्वे तृणे आदायेति अथ स्तीर्णायै वेदेरिति अतो वचनाभा
वे अन्यदेव ग्नास्थ ननु विशये लौकिकमिति वक्ष्यमाणत्वात् वाच्यमेतन्न तद्धि सामर्थ्ये न सर्वो
र्थे न प्राप्ता प्रानाप्तनीनां वा वनिकृ विनियोगं विनान्यस्मिन्कार्ये तेषां निराकरणपरं इदं त्वं स
र्वकार्यार्थस्य द्रव्यविशेषस्य संनिधानात् प्राप्तस्य निराकरणविषयमित्यपौनरुक्त्यं अथ एम
प्रसंगादिदं विंस्सते यूपांजने च सर्पिः किं प्रकृतं स्यात्त्यागनहीनव्यमुत प्रकृतं लौकिकमिति ६७

कितावस्मात्तमाज्यस्यास्याज्यं कुतः प्रकृतौ यावद्दाज्यकार्यं तत्सर्वं तेन कृतं अतः पशावपि
सर्वमाज्यकार्यं तेनैव कर्त्तव्यमित्येवं प्राप्ते आह पृषांजने च सर्पिः पृषांजने सर्पिर्ग्रहणमस्मदे
वत्तास्यं न तु प्रकृतस्याज्यस्याज्यं यद्यपि तत्प्रकृतावसंयुक्तमुत्पन्नं तथापि यानि प्रकृताज्यका
र्याणि तदर्थमेव अतः प्रकृतिवत्पशावपि तेन तदर्थं नैव भवितव्यं प्रकृतौ पृषाजनमस्ति न
स्मिन्वा तदाज्यस्यास्याज्यस्य प्रयोजकं अतो लौकिकमेवोपादाय पृषाजनं कर्त्तव्यं न तु तद्धि वि
शये लौकिकमित्यनेनैव सिद्धत्वात् पुनरुक्तमिदं मैवं न हि वाक्यावगत कार्यविशेषसंबंधाना
मग्नीनां तद्व्यतिरिक्तेषु कार्येषु संबंधनिराकरणार्थं इदं तु प्रकरणावगत कार्यविशेषसंबंध
स्यैव तस्याप्राकृतकार्यसंबंधनिराकरणार्थमित्यपौनरुक्त्यं पुरोडाशपयस्याधानासुच्छ
न्ज्योतिष्टोमे श्रूयन्ते पुरोडाशमात्रा तैन्द्रवायवे बार्हस्पत्ये पयस्या मैत्रावरुणे आश्विने धाना
इति तत्र पुरोडाशादिषु इच्छन् प्रकृतानि गृह्णीयात् उत सूत्रप्रकृतानि लौकिकानीति विक
ल्प इति केचित् तदपि न भूत्वा वा योक्त्वेवं व्यवस्थते चशब्दस्तु शब्दस्यार्थे पुरोडाशपयस्याधाना
सु तु यो प्रकृतान्कपालादिघान्सद्दृष्टन्वेद्येवोपादीयान्तश्चस्तन तः अंशस्त्वार्थ एवापं यद प्र
कृतस्योपादानं कुतः पुरोडाशादिबुद्धिनीयावर्शनानुरोडाशादीनामेवाप्रं प्रतिपन्निह यत्सं

© Dharmartha Trust J&K. Digitized by eGangotri

स्कारेण नमस्काराणां प्रतिपत्तिस्त्वविघमीनानां क्वविदु यथयुक्तानां च भवति न प्रतिपत्त्यर्थ
६८ र्थमुत्साघंते अपि वा वयवश्च वणन्यता निविघमानानां चामन्त्राणां स्वं तेनावयवार्थमुत्सा
68 घंते तस्माद्विदेवन्यपात्रेषु भवति यादिनराधं यजमानेन भक्षयितव्यमिति जैमिनेरथ्ययमे
वसिद्धांतः अपनमस्त्वकदेशस्याविघमानसंयोगादिति अतद्व्याख्यानं युक्तं प्रस्तरस्तृण
सूर्णम्रदसमिति तयोरुदगग्रस्तार्णयोर्विध्व सोरुपरि भागग्नं प्रस्तरं स्तृणाति ऊर्णम्रदसमिस
नेन मन्त्रेण तस्माद्देवबर्हिर्वती नाम तत्स्तर ९ स्तृणामि सूर्णम्रदसमिति श्रवणात् अत्र प्रस्तस्यां
गमधानार्थं जुहूधारणार्थं च तत्स्तरणं मंत्रे पित्र्यत्ते खासस्यं देवपितृभ्य इत्सूहः अतिनिद
धात्या त्वा वसवद्द इति आत्वा वसवद्द स्तनेन मंत्रेणाध्वर्युर्द्वाभ्यामपि हस्ताभ्यां प्रस्तमतिनि दधा
ति आक्रामति प्रस्तराभिमुखा पाणी निदधाति नमतिनिदधात्या त्वेति श्रुतेः नात्रोदकोप
स्पर्शनं ऊर्णम्रदसमात्वा प्रास्तरे इत्युक्त्वान्मन्त्रस्य प्रस्तरो देवता यतः आपस्तंवः तयोः प्रस्त
रमस्यादधासाभिद्रूतं तराणि प्रस्तरमूलानि बहिर्मूलेभ्यो जुहूरमिघ नाची सितैर्मन्त्रैरनूचीर
संस्रष्टाः स्तृणः सादयतीति स व्या भूम्ने जुहूं प्रति गृह्य निदधाति घृतवी इति अध्वर्युः जुहूम् राम
तिगृह्य प्रतिशब्दात् हस्ताधाः समर्पितामादयसव्या भूमे सव्येन हस्तेना भूम्ने अविमुक्ते प्रस्तरे ६८

© Dharmartha Trust J&K. Digitized by eGangotri

निदधाति घृताभ्यासिजुहूरिसनेन मंत्रेण भस्मरस्योपरि भागत्वा आसादयति अतिनिहित
एवस्मिन्नेनपाणिनाभवत्स्य दक्षिणेन जुहूं भवति गृह्णाति सव्वा उपरि जुहूं सादयस्तथ इत्
णः स्रुव इति श्रुतवान् अपि वा जुहूमेव प्रस्तरे समं मूले जुह्वा दंडं करोतीत्यापस्तंबः मनु
श्च जुहूं प्रस्तारे सादयति तरिक्षाभवसं जति समं मूले दंडं करोतीति प्रति गृह्णं वस मर्पण
पूर्वकं यतो यासैव वर्हिः प्रयच्छतीति श्रुतौ समर्पणे विहिते वर्हिः प्रतिगृह्योति सूत्रितं अतो
त्रापि प्रति गृह्येति सूत्रेण स्म मर्पणपूर्वकमेवादानं घृताचीइति मंत्रस्य यथार्थत्वाज्जुहमे
वोपपयस्या दावाज्य रहित केवलश्रुणा सादने घृताची सस्यैव एकस्य पदस्याप्रयोगः अ
सि जुहू नास्ति सेवं प्रयोज्यं एवं पयस्यायास्तु पभृ न्नाम्नेति प्रकृतावपि भागाज्यग्रहण दोहवि
नाशे पंचशराव दोहे क्रियमाणे जहू पभृतोर्घृतवत्सो सादने वैतं ज्ञेयं एवमित्तरे उत्तरा
न्यां प्रति मंत्रं वर्हिषु पभृतं प्रति मंत्रमेकैका मासादयति उपभृन्नाम्नेसु पभृतं ध्रुवा नाम्ने
ति ध्रुवामिति एवमेव प्राप्तुमतत्वात् न स्यापस्तंतस्तु उत्तरेण ध्रुवां चा व कृष्टे नुपूर्व इतरे जुह्वा अ
मे ह्वे स्रुवौ वर्हिष्या सादयति एवमिति प्रति गृह्य इतरे उपभृतं ध्रुवां कथमासादयति अ
नुपूर्वं अनुक्रमेण व कृष्टे अपस्कष्टे जुह्व पेक्षया उपभृतमवकृष्टां उपभृदपेक्षया च ध्रुवाम

© Dharmartha Trust J&K. Digitized by eGangotri

वत्कृष्टामिति उत्तराभ्यां मंत्राभ्यां जुहूं सुपभृतं प्रति न्यूष्टतरामिवाधस्ताद्ध्रुवायाः सादयेत्तरेणोप
६६ भृतं ध्रुवां प्रति न्यूष्टतरामिवोपरिष्टाद्ध्रुवायाः सोऽरिति तथा दक्षिणेन जुहूं ध्रुवां सादयेत् उत्तरे
69 ण वा ध्रुवामिति मानवे च अधस्ताद्ध्रुवायाः सोऽरुपभृतं उपरिष्टाद्ध्रुवायाः सो ध्रुवामसंसक्ताः स्रु
चो न्त्वचीः सादयतीति मंत्रान्तरविधानाद्बर्हिषीस तेन च प्रस्तरनिरासादेव शङ्केन प्रतिग्रस्वे
स्तेनावदेव लम्यमानो तेनीयसमर्पिते आहार्यासादयति ननु उपभृतं भावां चेति न वक्तव्यं इतरे
ऽस्रुक् त्वात् न सस्वं स्रुचामेवेदमासीदनं न तस्य स्याज्यस्येति ज्ञापनार्थं पुरुनक्तमिस दोषः
नकुर्नः स्रुक्तो स्रुचामेवासादनविधानान्न जुहूर्नोऽसीति जुहूपभृन्नीमेत्यूपभृतं क्रवीनासी
ति ध्रुवामेति तथा सवा उपरि जुहूऽस्सादयस्य धइ नरः स्रुच इति च जुहूर्नी सादि मंत्रलिं
गात् वचितायाः अप्रयोजनं विस्तनावोऽन्यग्रहणेनावेपि जुह्वादीनामासादनप्राप्तिः जुहूर्नी॥
त्रामां च भूपर्णकपत्रदोहनौ ढुवरस्रुवादीनां प्रतिग्रहपूर्वकं प्रस्तरे सादनं भवतीति पुरोडाशा
वविधार्यौ हृास्यो पस्तीर्णे निधाय नक्ति यस्ते प्राणइति ध्रुवा सह नानन्तरंगार्हपत्यस समीपे गत्वा
पुरोडाशावतिधार्यौ नरन उद्धास्यो पूर्वान्तरमुपस्तीर्णे पात्रे निधाय यस्ते प्राण इति मंत्रेण नक्ति राम
उपस्तीर्णे इति निष्ठां तेन भूतपूर्वनिर्देशः स्रुचि वत्तरमुपस्तरणंप न उद्धास्यो प्रस्तरणं कर्तुमशा। ६६

© Dharmartha Trust J&K. Digitized by eGangotri

कृत्वं पुरोडाशेन रुद्रहस्तत्वा न एतदिति धारणं हविर्मात्रस्य भवति पुरोडाशग्रहणमुपलक्षणा
र्थं अग्नाहापस्तंबः कपालवत्पुरोडाशानंगारेणापोह्येति सूर्येत्साग्नेयं पुरोडाशग्रहणमभिधारय
ति नूनमीमुत्तरं यत्नात्तरं यमस्त इति मानत्देहंस्मो नं जर इति पात्र्यामुपस्तीर्य पर्यावर्त्य पुरोडाश
मनक्तिशमुद्वास्य वेदेन प्रमृज्य नस्मिंश्रीदिति पात्र्यां प्रतिष्ठापयति स्रुवेण कपालानि प्रत्य
ज्य पुरोडाशस्य खशक्तिमिति उपरिष्टादस्य ज्याचस्तादुपानक्तीति च कपालवदिति वेदेनेत्यर्थः
नितिरीयेपि अथादत्ते दक्षिणेनाज्यस्थालीं स्रुवं च वसनेन पात्रीं वेदिमित्येतत्समादाय प्रद
क्षिणमावृत्य प्रत्यगुदावृत्य सव्यपनेन गार्हपत्यमुपविश्य पात्र्यां द्वेधोपस्तरणं तेस्मोनंनइति अ
थ धक्षिमादाय दक्षिणस्य पुरोडाशस्यांगाराणपोहनादेमहमिति वेदेनविरजसं कृत्वेति वार
यति अथेनमुद्वासयति उपरिष्टादभ्यज्याचस्तादुपानक्तीति च मानवे च वेदेन पुरोडाशमस्मा
पोहति वेदेपपाम अथाज्यस्थाल्याः स्रुवेणाभिघारयति पात्र्यामुपस्तरणमिति उदगुद्वासयति
वेदेनापतस्मानं करोस्मनिभस्माणिनावेदशिरसा चेति न तउपस्तीर्णे सादयति तनोयस्तरत्सन
क्तिअप पर्यवर्त्य पत्तचस्तावोपानक्तीनादाहवलकरातिअभ्रदाहरतिहवीषिदक्षिणतो जुह्वाः
पूर्णस्रुवं सादयत्स्रगेणध्रुवां वेदमुत्तरेण क्रवामाज्यस्थालीमपरेणास्रुवं इडापात्रीं दक्षिण

© Dharmartha Trust J&K. Digitized by eGangotri

स्यां वेदिश्रोण्यां सायंदोहमुत्तरस्यां प्रातर्दोहमिति काठके च ततो पुरोडाशौ वेदेन सन्नज्योल

७० ङ्मयपात्र्यां सादयति यानि घर्म इति कपालानि विमुंचतीति मोचनेनेनोहे द्वौ प्रदूवेद्यां सा

70 दयति श्रोण्योर्दक्षिणस्यां प ततः पात्र्योः स्थापनं ततः पुरोडाशयोरस्तिधारः ततः पात्र्यो

ह्यस्तारः तदुद्वासनं वेदेन पुनर्विरजस्ककरणं ततः स्थापनं पात्र्योः उपरि निःमाणएन

मिति अस्मिन्मंत्रे यजमानानां सांविदेति द्विजमानकेऊहः स्वर्यजमानेभ्यो विंदेति वहुयजमा

+सायदोहमथभ इति प्रस्तरे स्रुचं दक्षिणात्स्रुग्म इति ततो त्रायं क्रमः प्रथमवेदेन पुरोडाशेतितस्मी)

करणं+ नकायथादेवतमन्यत अंजनमंत्रेणिगच्छेत्स स्वस्थाने यथादेवतं प्रयोजंयस्य हवि

षाघादेवता तस्मिन्हविषि तद्देवता वा विपर्द्वितीयां तं संप्रयोज्यमित्सर्थः तद्यथाअग्नीषोमी

ये पुरोडाशेग्निषोमौ गरेतिदोह्ययोरिंद्रगच्छेति एवं सर्वत्रा प्रस्य वक्ति कपालानि यानि घर्म इति

यानि घर्म इति मंत्रेण स्रुवेण कपालान्यनक्ति अंजनं च प्रसेकमुपधानक्रमेण कार्यं युग

पक्कर्तुमशक्यत्वात् प्रतिकपालं च मंत्रप्रयोगः वहु चचतं तु पूजार्थं अंतरणं विजितेनेएक

कपालद्विकपालेष नूहः प्रकृतावसमवेतत्वात् नूंसीवां अथवा नूहुंसी मंत्रविनिवेशस्था एम

तरस्रुवेणैव प्रसेकमुपधानक्रमेणैव कपालान्यनक्ति तथा हाप्यस्तं वः स्रुवेण कपालानि ७०

© Dharmartha Trust J&K. Digitized by eGangotri

यस्याज्येति संख्ययोद्वासयति संख्यया संख्यावाचिना पूरणप्रत्ययान्तेन शब्देन पूरणमंत्रानू
क्तेन प्रथमं द्वितीयं तृतीयमित्येवं गणयन् उपचारक्रमेणैव कपालान्युद्वासयति प्रथममु
द्वासयामि द्वितीयमुद्वासयामीत्येवं प्रत्येकं प्रयोगः विकृतौ कर्परस्यापि कपालस्था
नीयत्वाज्जन उद्वासने भवतः प्रियेण धाम्नेति हवींषि वेद्यां कृत्वा अवसदन्निति सर्वाण्या
लभते प्रियेण धाम्नेत्यनेन मंत्रेणाज्यस्थाली पुरोडाशादीनि हवींषि क्रमेण वेद्यां कृत्वा उद
क्तस्थानि ध्रुवाया उत्तरतो वेद्यामासाद्य कृत्वा अवसदन्निति मंत्रेणैतानि सर्वाणि हवींष्याल
भते उपयोगक्रमेण तेन प्रथममाज्यस्थाल्याज्यस्यान्ततो जुहूपभृद्ध्रुवास्थस्याज्यस्य ततः पु
रोडाशादेरिति पाहि यज्ञपतीति द्वियजमानके पाहि यज्ञपतीनिति बहुयजमानके चाहः आ
यस्तवः अपरेण स्रुवः पुरोडाशं वासादयत्युत्तरैर्दोहावपि वा मध्ये वेद्याः स्थानीयकुंभ्यौ सं
दधाति पूर्वं प्रथमं परं दक्षिणं श्रोणाः प्रत्तमासादयत्युत्तरं सांदधीति तथा अग्रेणोत्तरेण
वा ध्रुवां वेदं निधाय वेदनाः परिस्तीर्य होतृषदनं कल्पयित्वा समिधेनीभ्यः प्रतिपद्यत इति
विकृतौ वपा प्रयोगक्रमेणैव हविषामालंभनं तेन ध्रौवालंभनादुत्तरं दृषदाज्यालंभनं य
शीकार्य पाहि मामिति सात्त्वानं हविषामालंभनं तरं पाहि मां यज्ञयमित्यनेन मंत्रेणाध्वर्युणा

© Dharmartha Trust J&K. Digitized by eGangotri

७१

नमालभते हृदयदेशं हस्तेन स्पृशति ततो पउस्पृशति च आत्मानमालभ्य उपस्पृशेदिति
परिभाषितत्वात् स चायमालंभ आत्मसंस्कारः करिष्यमाणकर्मार्थ आराद्दुपकारकः त
तश्चपशौ सुसाम्यौ च पुनः पुनर्हविरासादने कृतेन भवति प्रसमन एव सकृत्कृतेनात्मनः
कर्मसमाप्तिपर्यंतसंस्कृतत्वादिति अस्त्वमेवं प्रथमेहनि संस्थिते सर्वरात्रमध्वर्योरन्नहो
मो विहितः सं स्थिते ग्निष्टोमे परिहृता सु वसतीवरीषु अध्वर्युरन्नहोमाञ्जुहोतीति तत श्रुति
विरोधान्मध्यमाहः संवं आपररात्रिकं कर्म सर्वं प्रतिप्रस्थाता करोतीति तत्र च प्रतिप्रस्थात्रा अ
पररात्रे सवनीयपशूनां तत्र स्व आज्यासादनीलंभांते अध्वर्युरन्नान्तते होमं कुर्वन्नेवात्मानं न क
रोति तस्य करिष्यमाणकर्मार्थत्वादित्यादिति अन्त्रवा व्रतोपायनमत्रवाम्नतोपाघनं अत्रा
स्मिन्नवसने वी व्रतोपायनं व्रतग्रहणं भवति शाखांतरात् द्विरभ्यासो ध्यायपरिसमाप्तिसू
चनार्थः महायाज्ञिकश्रीदेवदत्तकृते कात्यायनसूत्रे द्वितीयोऽध्यायः समाप्तः समाप्तोयं
द्वितीयाध्यायः लेखकपाठकयोः शुभं भवतु ॥ ॥श्रीरामचंद्राय नमः॥ ॥

रम
७१

© Dharmartha Trust J&K. Digitized by eGangotri